© 2003 Cosmic Software and Vedic Engineering. This text is made available exclusively for on-line use, and for printing individual copies for personal use. Distribution of hard copies, or distribution of electronic files via the internet is expressly prohibited. For licensing, and for an editable text version on CD-ROM, please contact cssetzer@yahoo.com.

अथ श्रीपाद्मे महापुराणे चुतर्थं ब्रह्मखण्डं प्रारभ्यते
श्रीवेदव्यासाय नमः

प्रथमोऽध्यायः

शौनकउवाच-
कलौसमागतेसूतप्राणिनांकेनकर्मणा
उद्धारोवैभवेत्तस्मात्कथयस्वममाग्रतः १
सूतउवाच-
साधुसाधुमुनिश्रेष्ठपुण्यात्मनांवरोभवान्
सर्वेषांचजनानांचशुभवाञ्छोनिरंतरम् २
एतद्व्यासःपुराविप्रःसर्वज्ञःसर्वपूजितः
पृष्टोजैमिनिनातंसयदाहश्रृणुवैष्णव ३
दंडवत्प्रणिपत्यासौव्यासंसर्वार्थपारगम्
गुरुंसत्यवतीसूनुंपप्रच्छमुनिपुंगवः ४
जैमिनिरुवाच-
कलौनृणांभवेत्केनमोक्षोवैकथयस्वमे
अल्पेनापिचपुण्येनमर्त्याश्चाल्पायुषोयतः ५
व्यासउवाच-
साधुसंगाद्भवेद्विप्रशास्त्राणांश्रवणंप्रभो
हरिभक्तिर्भवेत्तस्मात्ततोज्ञानंततोगतिः ६
नरोचतेकथाभूमौपापिष्ठायजनायवै
वैष्णवीसतुविज्ञेयःपापिष्ठप्रवरोद्विजः ७
श्रीकृष्णस्यकथांश्रुत्वाऽनदीभवतिवैष्णवः
असत्यांतांतुयोब्रूयाज्ज्ञेयःसपापिनांगुरुः ८
यस्मिन्यस्मिन्स्थलेविप्रकृष्णस्यवर्ततेकथा
तस्मात्तस्माज्जगन्नाथोयातित्यक्त्वानकर्हिचित् ९
कृष्णस्ययःकथारंभेकुर्याद्विघ्नंनराधमः
नरकान्निष्कृतिर्नास्तिमन्वंतरशतावधि १०
येपुराणकथांश्रुत्वानिंदंत्युपहसंतिवै
तेषांकरस्थानरकाबहुक्लेशकराःसदा ११

जन्मांतरार्जितंपापंतत्त्क्षणादेवनश्यति
श्रीकृष्णचरितंयोवैश्रोतुमिच्छांकरोत्यपि १२
भक्त्यायोवैनरःकुर्यात्श्रीकृष्णचरितंतथा
नजानेश्रवणेतस्यकागतिर्वाभविष्यति १३
ब्रह्महत्यादिकंपापंअकालमरणंतथा
सुरापानंतथास्तेयंसर्वंनश्यतिपापिनः १४
पापंकृत्वातुयोमर्त्यःपश्चात्पापंनिवर्तयेत्
तस्यपापंव्रजेन्नाशमग्निनातूलराशिवत् १५
श्रीकृष्णचरितंविप्रतिष्ठेद्वैपुस्तकंगृहे
तस्यगृहसमीपंहिनायांतियमकिंकराः १६
जैमिनिरुवाच-
वदंतिवैष्णवान्कांश्चवांच्छाब्रूहिगुरोमम
इदानींतान्समाज्ञातुंतेषांमाहात्म्यमुत्तमम् १७
व्यासउवाच-
योनरोमस्तकेभक्त्यावैष्णवांघ्रिजलंद्विज
करोतिसेचनंपापीतीर्थस्नानेनतस्यकिम् १८
साधुसंगंतुयःकुर्य्यात्क्षणंवार्द्धक्षणंद्विज
तस्यनश्यंतिपापानिब्रह्महत्यामुखानिच १९
यत्रयत्रकुलेचैवएकोभवतिवैष्णवः
कुलंतस्ययदापापैर्युक्तंतन्मोक्षगामिवै २०
हिंसादंभकामक्रोधैर्वर्जिताश्चैवयेनराः
लोभमोहपरित्यक्ताज्ञेयास्तेवैष्णवाद्विज २१
पितृभक्तादयायुक्ताःसर्वप्राणिहितेरताः
अमत्सरावैष्णवायेविज्ञेयाःसत्यभाषिणः २२
विप्रभक्तिरतायेचपरस्त्रीषुनपुंसकाः
एकादशीव्रतरताविज्ञेयास्तेचवैष्णवाः २३
गायंतिहरिनामानितुलसीमाल्यधारकाः
हर्यंघ्रिसलिलैःसिक्ताविज्ञेयास्तेचवैष्णवाः २४
श्रोत्रयोर्मस्तकेयेषांतुलस्याःपर्णमुत्तमम्
कर्हिचिद्दृश्यतेविप्रविज्ञेयास्तेचवेष्णवाः २५

पाखंडसंगरहिताविप्रद्वेषविवर्जिताः
सिंचेयुस्तुलसींयेचज्ञातव्यावैष्णवानराः २६
पूजयंतिहरिंयेचतुलस्याचार्चयंतिये
कन्यादानरतायेचयेवैह्यतिथिपूजकाः २७
शृणवंतिविष्णुचरितंविज्ञेयावैष्णवानराः
यस्यगृहेसुप्रतिष्ठेत्शालग्रामशिलापिच २८
मार्जयंतिहरेःस्थानंपितृयज्ञप्रवर्तकाः
जनेदीनेदयायुक्ताविज्ञेयास्तेचवैष्णवाः २९
परस्वंब्राह्मणद्रव्यंपश्यंतिविषवच्चये
हरिनैवेद्यंयेय्नऽश्नन्तिविज्ञेयावैष्णवाजनाः ३०
वेदशास्त्रानुरक्तायेतुलसीवनपालकाः
राधाष्टमीव्रतरताविज्ञेयास्तेचवैष्णवाः ३१
श्रीकृष्णपुरतोयेचदीपंयच्छंतिश्रद्धया
परनिंदांनकुर्वंतिविज्ञेयास्तेचवैष्णवाः ३२
सूतउवाच-
पृष्टोजैमिनिनाव्यासइत्युक्तःसयथाक्रमम्
मयेदंकथ्यतेब्रह्मन्यत्प्रसंगाद्गुरोःश्रुतम् ३३
अध्यायंश्रद्धयायुक्तंयेशृणवंतिनरोत्तमाः
सर्वपापविनिर्मुक्तायांतिविष्णोःपरंपदम् ३४

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेव्यासजैमिनिसंवादेप्रथमोऽध्यायः १

द्वितीयोऽध्यायः

सूतउवाच-
शृणुशौनकवक्ष्यामिचान्यधर्म्मंपुरातनम्
व्यासजैमिनिसंवादंश्रोतृणांपापनाशनम् १
जैमिनिरुवाच-
कर्म्मणाहिगुरोकेनमंदिरंजगतीपतेः
यातितत्कथयस्वाद्यनरःपापीचमेप्रभो २
व्यासउवाच-
श्रीकृष्णमंदिरेयोवैलेपनंकुरुतेनरः

सर्वपापविनिर्मुक्तःश्रांतोयातिहरेर्गृहम् ३
यश्चांबुलेपनंकुर्यात्संन्नेपाच्छृणुजैमिने
तस्यपुण्यमहंवच्मिमंदिरेजगतीपतेः ४
तत्रयावंतिपश्यंतिरजांसिचद्विजोत्तम
तावत्कल्पसहस्राणिसवसेद्विष्णुमंदिरे ५
पुरासीद्दंडकोनाम्नाचौरोलोकभयप्रदः
ब्रह्मस्वहारीमित्रघ्नोयुगेद्वापरसंज्ञके ६
असत्यभाषीक्रूरश्चपरस्त्रीगमनेरतः
गोमांसाशीसुरापश्चपाखंडजनसंगभाक् ७
वृत्तिच्छेदीद्विजातीनांन्यासापहारकस्तथा
शरणागतहंताचवेश्याविभ्रमलोलुपः ८
एकदासद्विजश्रेष्ठकस्यचिद्विष्णुमंदिरम्
जगामहरणार्थायविष्णोर्द्रव्यंसमूढधीः ९
अथद्वारिप्रविश्यासावंघ्रिःकर्द्दमसंयुतः
प्रोच्छितःसकलंनिम्नेभूमौदेवगृहस्यच १०
तेनैवकर्म्मणाभूमिर्निम्नरिक्ताबभूवह
लोहस्यचशलाकाभ्यांमुद्घाटयत्वररंमुदा ११
प्रविवेशहरेर्गेहंवितानवरशोभितम्
रत्नकांचनदीपाढ्यंपरिध्वस्तमहत्तमम् १२
नानापुष्पसुगंधाढ्यंनानापात्रसमाकुलम्
सुवासितस्यतैलस्यगंधेनपरिपूरितम् १३
अनेनहारकेणाथपर्य्यंकेसुमनोहरे
शायितोराधयासार्द्धंदृष्टःपीतांबरोऽच्युतः १४
प्रणम्यराधिकानाथंनिष्पापःसोऽभवत्तदा
नेष्याम्यथननेष्यामिअनेनकिंभवेन्मम १५
सेवांकर्त्तुमशक्तोऽहयतश्चौरोऽस्मिसर्वदा
द्रव्येणकार्यमस्तीतितन्नेतुंकृतवान्मनः १६
पातयित्वांशुकंभूमौकौशेयंकमलापतेः
बबंधवस्तुजातंचपाणौकृत्वासकंपितः १७
विष्णोर्मायापतेश्चाथतानिसर्वाणिजैमिने

कृत्वाशब्दंसुघोरंचपतितान्यथतानिवै १८
परित्यज्यसुनिद्रांचधावंतइतिकिन्वहो
आगताबहुशोलोकाश्चोरोद्रव्यंजवेनच १९
त्यक्त्वाधनंचचौरोऽपित्रस्तःकिंचिन्नगामह
दंशितःकालसर्पेणमृतोऽसौगतकिल्बिषः २०
यमाज्ञयातस्यदूताःपाशमुद्गरपाणयः
आगतास्तंसमानेतुंदंष्ट्रिणश्चर्मवाससः २१
बबंधुश्चर्मपाशेननिन्युर्दुर्गमवर्त्मना
दृष्ट्वातंशमनःक्रुद्धःपप्रच्छसचिवंप्रति २२
यमउवाच-
अनेनकिंकृतंकर्मपापंवापुण्यमेववा
समूलंवदहेप्राज्ञचित्रगुप्तममाग्रतः २३
चित्रगुप्तउवाच-
सृष्टानियानिपापानिविधात्रापृथिवीतले
कृतान्यनेनमूढेनसत्यमेतन्मयोदितम् २४
किंत्वाकर्णयलोकेशसुकृतंचास्यवर्त्तते
मन्येऽहयमुनाभ्रातःसर्वपापविलोपितत् २५
धर्मराजउवाच-
किंपुण्यंवर्त्ततेऽमात्यवदसारंममांतिके
श्रुत्वैवंतद्विधास्यामियत्रयोग्योभवेदसौ २६
यमस्यवचनंश्रुत्वासभयश्चित्रगुप्तकः
कृत्वाहस्तांजलिप्राहचात्मनःस्वामिनेद्विज २७
चित्रगुप्तउवाच-
हरणार्थंहरेर्द्रव्यंगतोऽसौपापिनांवरः
प्रोज्झितःकर्दमोराजन्पादयोर्द्वारतोहरेः २८
बभूवलिप्तासाभूमिर्बिलच्छिद्रविवर्जिता
तेनपुण्यप्रभावेणनिर्गतंपातकंमहत्
वैकुंठंप्रतियोग्योऽसौनिर्गतस्तवदंडतः २९
व्यासउवाच-
श्रुत्वासवचनंतस्यपीठंकनकनिर्मितम्

ददौतस्मैचोपविष्टस्तत्रपूज्योयमेनसः ३०
ननामशिरसातंवैप्रोवाचविनयान्वितः
यमउवाच-
पवित्रंमंदिरंमेऽद्यपादयोस्तद्धिरेणुभिः ३१
कृतार्थोऽस्मिकृतार्थोऽस्मिकृतार्थोऽस्मिनसंशयः
इदानींगच्छभोसाधोहरेर्मंदिरमुत्तमम् ३२
नानाभोगसमायुक्तंजन्ममृत्युनिवारणम्
व्यासउवाच-
इत्युक्त्वाधर्मराजोऽसौस्यंदनेस्वर्णनिर्मिते ३३
राजहंसयुतेदिव्येतमारोप्यगतैनसम्
समस्तसुखदंस्थानंप्रेषयामासचक्रिणः ३४
एवंप्रविष्टोवैकुंठेतत्रतस्थौसुखंचिरम्
लेपनंयेप्रकुर्वंतिभक्त्यातुहरिमंदिरम् ३५
तेषांकिंवाभविष्यतिनजानेऽहद्विजोत्तम
यइदंशृणुयाद्भक्त्यापठेद्योवासमाहितः ३६
कोटिजन्मार्जितंपापंनश्यत्येवनसंशयः ३७
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेहरिमंदिरलेपनमाहात्म्यं
नामद्वितीयोऽध्यायः २

तृतीयोऽध्यायः

शौनकउवाच-
कार्त्तिकस्यचमाहात्म्यंब्रूहिसूतममाग्रतः
तद्व्रतस्यफलंकिंवादोषंकिंतदकुर्वतः १
सूतउवाच-
पुरैकदामुनिश्रेष्ठव्यासंसत्यवतीसुतम्
जैमिनिःपृष्टवानेतदारेभेकथितंमुनिः २
व्यासउवाच-
तिलतैलंमैथुनंयःशुभदेकार्त्तिकेत्यजेत्
बहुजन्मकृतैःपापैर्मुक्तोयातिहरेर्गृहम् ३
मत्स्यंचमैथुनंयोवैकार्त्तिकेनपरित्यजेत्

प्रतिजन्मनिसंमूढःशूकरश्चभवेद्ध्रुवम् ४
कार्त्तिकेतुलसीपत्रैःपूजयेद्वैजनार्दनम्
पत्रेपत्रेऽश्वमेधस्यफलंप्राप्नोतिमानवः ५
कार्त्तिकेमुनिपुष्पैर्यःपूजयेन्मधुसूदनम्
देवानांदुर्लभंमोक्षंप्राप्नोतिकृपयाहरेः ६
कार्त्तिकेमुनिशाकंवैयोऽश्नातिचनरोत्तमः
संवत्सरकृतंपापंशाकेनैकेननश्यति ७
फलंतस्यनरोऽश्नातिचोर्जेयोवैहरिप्रिये
प्रदत्त्वातुहरेर्ब्रह्मन्वृजिनंकोटिजन्मजम् ८
सुरसंसर्पिषायुक्तंदद्याद्योहरयेपिच
सर्वपापैर्विनिर्मुक्तःसगच्छेद्धरिमंदिरम् ९
कार्तिकेयोनरोदद्यादेकपद्मंहरावपि
अंतेविष्णुपदंगच्छेत्सर्वपापविवर्जितः १०
प्रातःस्नानंनरोयोवैकार्तिकेश्रीहरिप्रिये
करोतिसर्वतीर्थेषुयत्स्नात्वातत्फलंलभेत् ११
कार्तिकेयोनरोदद्यात्प्रदीपंनभसिद्विजः
विप्रहत्यादिभिःपापैर्मुक्तोगच्छेद्धरेर्गृहम् १२
मुहूर्तमपियोदद्यात्कार्त्तिकेप्रीतयेहरेः
दीपंनभसिविप्रेन्द्रतस्मिंस्तुष्टःसदाहरिः १३
योदद्याच्चगृहेदीपंकृष्णस्यसघृतंद्विजः
कार्तिकेचाश्वमेधस्यफलंस्याद्वैदिनेदिने १४
प्रदीपस्यचमाहात्म्यंविशेषमुच्यतेमया
निशामयद्विजश्रेष्ठसेतिहासंसमाहितः १५
पूर्वंत्रेतायुगेविप्रोवैकुंठोनामतःशुचिः
यस्यसंगप्रभावेणमुक्तोभवतिपातकी १६
एकदाकार्तिकेसोऽपिप्रदीपंपुरतोहरेः
दत्वागृहंगतोविप्रोघृतपूर्णंद्विजर्षभः १७
सर्पिस्तत्स्वादितुचाखुरागतोऽपिप्रदीपतः
यावत्खादितुमारेभेबोधितोऽसौप्रदीपकः १८
मूषकोऽग्निभयात्तत्रवेगेनापिपलायितः

ऋाखोश्चसकलंपापंविनष्टंकृपयाहरेः १९
सर्पेणदंशितश्चाखुःप्राणत्यागंचकारह
ततोयमाज्ञयादूताःपाशमुद्गरपाणयः २०
ऋागतास्तंसमानेतुंबबंधुश्चर्मरज्जुभिः
यावन्नेतुंमनश्चक्रुःशंखचक्रगदाधराः २१
ऋागतागरुडारूढाविष्णुदूताश्चतुर्भुजाः
विमानंगगनेचैवराजहंसयुतंशुभम् २२
निर्मितंकनकैःशुद्धैःकामगंकृपयाहरेः
पाशंछित्वाततोदूताःप्रोचुस्तेयमकिंकरान् २३
विष्णुभक्तोऽप्यसौमूढाव्यर्थंतुबंधनंकृतम्
गच्छध्वंशमनप्रेष्यायदिवांछास्तिजीवितुम् २४
श्रुत्वाप्रकंपितास्तेवैपृच्छंतिविनयान्विताः
केनपुरायप्रभावेणयुष्माभिर्नीयतेपुरम् २५
ऋसौविष्णोर्महापापीयूयंतद्वक्तुमर्हथ
विष्णुदूताऊचुः-
पुरतोवासुदेवस्यप्रदीपबोधनंकृतम् २६
तेनैवकर्मणादूतानयामोविष्णुमंदिरम्
ऋनिच्छयापियःकुर्याद्विष्णोर्दीपस्यबोधनम् २७
कोटिजन्मार्जितंपापंत्यक्त्वायातिहरेर्गृहम्
भक्त्याप्रदीपंयोदद्यात्कार्तिकेतुहरेर्दिनैः २८
तस्यपुरायंसमाख्यातुंनशक्तोहरिणाविना
घृतपूर्णप्रदीपंयोभक्त्याददद्याद्धरेर्गृहे २९
ऋश्वमेधसहस्रेणतस्यकिंवाप्रयोजनम्
ऋश्वमेधप्रकर्तायःस्वर्गंयातिहरेर्दिने ३०
कार्तिकेदीपदाताचसगच्छेद्धरिमंदिरम्
व्यासउवाच-
इतिश्रुत्वाततोदूतागतास्तेवैयथागताः ३१
विष्णुदूतारथेकृत्वागतास्तंविष्णुमंदिरम्
विष्णुसान्निध्यएवास्यमन्वंतरशतंगतम् ३२
ततोमर्त्येराजकन्याबभूवकृपयाहरेः

पुत्रपौत्रसमायुक्ताचिरंभोगंचकारसा ३३
इतःपुनर्गतासातुगोलोकंहरिसेवया
सूतउवाच-
भक्त्याशृणोतियोमर्त्योदीपमाहात्म्यमुत्तमम् ३४
सर्वपापविनिर्मुक्तःसयातिविष्णुमंदिरम् ३५
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेदीपदानमाहात्म्यं
नामतृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

शौनकउवाच-
जयंत्याःसूतमाहात्म्यंकदासाक्रियतेजनैः
कथयस्वमयित्वंवैपोतःसंसारसागरे १
सूतउवाच-
शृणुविप्रप्रवक्ष्यामियत्पृष्टोमुनिसत्तम
पुराब्रह्मानारदेनपृष्टएतत्सुरालये २
नारदउवाच-
जयंत्याश्चैवमाहात्म्यंकथयस्वपितामह
यच्छ्रुत्वाहंगमिष्यामितद्विष्णोःपरमंपदम् ३
ब्रह्मोवाच-
शृणुष्वावहितोविप्रतवाग्रेकथयाम्यहम्
जयंत्याउपवासेनविष्णुलोकंसगच्छति ४
स्मरणात्कीर्तनात्पापंसप्तजन्मार्जितंमुने
जयंतीदहतेतच्चकिंपुनःसोपवासकृत् ५
जन्माष्टमीचनवमीचैत्रेमासिसिताशुभा
कृष्णाचतुर्दशीकुंभेमेषेशुक्लाचतुर्दशी ६
दुर्गाष्टम्याश्विनेशुक्लाद्वादशीश्रवणान्विता
महापुण्याश्चशुभदाजयंत्यःषट्प्रकीर्तिताः ७
कृष्णजन्माष्टमीपूर्वाप्रसिद्धापापनाशिनी
क्रतुकोटिसमाह्येषातीर्थानामयुतैःसमा ८
कर्तागवांसहस्रंतुयोददातिदिनेदिने

तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे ९
हेमभारसहस्रंतुकुरुक्षेत्रेरविग्रहे
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १०
कृष्णाजिनसहस्राणितिलधेनुशतानिच
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे ११
कन्याकोटिसहस्राणांदानेभवतियत्फलम्
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १२
ससागरामिमांपृथ्वद्यंदत्वायल्लभतेफलम्
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १३
वापीकूपतडागदिकर्तव्यंदेवतालये
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १४
मातापित्रोर्गुरूणांचभक्तिंयुक्तःकरोतियः
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १५
आपदाहरणार्थायतीर्थसेवाकृतात्मनाम्
सत्यव्रतानांयत्पुण्यंजयंत्यांसमुपोषणे १६
गंगायांनर्मदायांयत्पुण्यंसारस्वतेजले
स्नात्वापुण्यमवाप्नोतिजयंत्यांसमुपोषणे १७
यत्पुण्यंश्राद्धकर्तृणांपितृणामिंदुसंक्षये
तत्फलंसमवाप्नोतिजयंत्यांसमुपोषणे १८
नारदउवाच-
केनकेनकृतापूर्वंकथयस्वपितामह
ब्रह्मोवाच-
कार्तवीर्येणकर्णेनकुमारेणचधीमता १९
सगरेणदिलीपेनकाकुस्थेनकृतापुरा
गौतमेनचगार्ग्येणजामदग्न्येनधीमता २०
वाल्मीकिनाकृतापूर्वंद्रौपदेयेनसाधुना
ददातिवांछितान्कामान्भाद्रपस्यसिताष्टमी २१
प्राजापत्यर्क्षसंयुक्ताविशेषेणमताष्टमी
वर्षेवर्षेप्रकर्तव्याप्रीत्यर्थेचक्रपाणिनः २२
कोटिजन्मार्जितंपापंमुहूर्तेनविलीयते

रात्रौजागरणंकृत्वानिष्ठापूर्वंजितेंद्रियः २३
गंधपुष्पादिनैवेद्यैःपूजनीयःपृथक्पृथक्
एवंयःकुरुतेविप्रजयंतीसमुपोषणम् २४
कोटिजन्मार्जितंपापंज्ञानतोऽज्ञानतःकृतम् २५
प्रसादाद्देवकीसूनोर्यामार्द्धेनविलीयते
जयंतीतिथिसंप्राप्तौभुंजतेयेनराधमाः २६
त्रैलोक्यसंभवंपापंभुंजतेतेनसंशयः
सागराद्यानितीर्थानिमुक्तस्थानानिसर्वशः २७
गृहेतिष्ठंतिसर्वांगेजयंतीव्रतकारिणः
तस्यसर्वाणितीर्थानिदेहेतिष्ठंतिदेवताः २८
करोतियोनरोभक्त्याजयंतींकृष्णवल्लभाम्
नवेदेनपुराणेनमयादृष्टंमहामुने २९
तत्समंनाधिकंवापिकृष्णराधाष्टमीव्रतम्
नकरोतिनरोभक्त्यासभवेत्क्रूरराक्षसः ३०
योनरोऽश्नातिमूढात्माजयंतीवासरेद्विज
महानरकमश्नातियथाचहरिवासरे ३१
अतीतमागतंयस्तुकुलमेकोत्तरंशतम्
पतेत्तुनरकेघोरेजयंत्यांभोजनेनवै ३२
जयंतीबुधवारेचरोहिण्यासहितायदा
भवेच्चमुनिशार्दूलकिंकृतैर्व्रतकोटिभिः ३३
कृतेत्रेतायुगेचैवद्वापरेचकलौयुगे
कृतासम्यग्विधानेनजयंतीपापनाशिनी ३४
जागरेपद्मनाभस्यपुराणंपाठयेत्तुयः
आजन्मोपार्जितंपापंदहतेतूलराशिवत् ३५
यःशृणोतिनरोभक्त्यापुराणंहरिवासरे
कोटिजन्मार्जितंतस्यपापंनश्यतितत्क्षणात् ३६
वासरेपद्मनाभस्यपूजयेद्वाचकंमुने
कुलकोटिंसमुद्धृत्यविष्णुलोकेसपूज्यते ३७
जयंत्यामुपवासेनयोनरोऽत्रपराङ्मुखः
सर्वधर्मविनिर्मुक्तोयात्यसौनरकंध्रुवम् ३८

गंधपुष्पैश्चधूपैश्चघृतपूर्णप्रदीपकैः
पूजयेद्भक्तिभावैश्चदद्याद्विप्रायदक्षिणाम् ३९
विधिनानेनयोविप्रजयंतींप्रकरोतिच
नरोवैतारयेद्भक्त्यापुरुषानेकविंशतिम् ४०
नदौर्भाग्यंनवैधव्यंनभवेत्कलहोगृहे
संततेर्नविरोधंचनपश्यतिधनक्षयम् ४१
यान्यांश्चिकीर्षतेकामान्जयंतीसमुपोषकः
तांस्तान्प्राप्नोतिसकलान्विष्णुलोकंसगच्छति ४२
विष्णुभक्तिपरानित्यंजयंतीव्रतमानसाः
तेधन्यास्तेकुलीनास्तेईश्वरास्तेचपंडिताः ४३
यानिकानिचतीर्थानिव्रतानिनियमानिच
जयंतीवासरस्यैवकलांनार्हंतिषोडशीम् ४४
भाद्रेवैचोभयेपक्षेयःकरोतिसभार्यकः
राधाकृष्णाष्टमींवत्सप्राप्नोतिहरिसन्निधिम् ४५
व्रतंचपुरयकारंचयःकरोतिसदाहरेः
सयातिविष्णोर्वैकुंठंजयंतीसमुपोषकः ४६
ग्राचारहीनंकुलभ्रष्टंकीर्तिहीनंकुयोनिजम्
नाशयत्याशुपापंचजयंतीहरिवल्लभा ४७
मेरुतुल्यानिपापानिब्रह्महत्यादिकानिच
सनिर्दहतिसर्वाणिजयंत्यांसमुपोषकः ४८
पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनम्
मोक्षार्थीलभतेमोक्षंजयंत्यांसमुपोषकः ४९
जयंतीकरणेचित्तंयेषांभवतितत्परम्
यमोऽपिशंकतेनित्यंतेयांतिपरमांगतिम् ५०
सूतउवाच–
कथयित्वानारदंतुययौसचयथागतः
मयापिकथितंब्रह्मन्यत्पृष्टोऽहत्वयामुने ५१
माहात्म्यंचजयंत्यायेशृरावंतिभक्तिभावतः
तेपियांतिपरंधामविमुक्ताःसर्वपातकैः ५२
पुराणवाचकंब्रह्मन्जयंतीव्रतिनंतथा

येपश्यंतिनराःपापास्तेयांतिपरमंपदम् ५३
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेब्रह्मनारदसंवादेजयंतीव्रतमाहात्म्यं नामचतुर्थोऽध्यायः ४

पंचमोऽध्यायः

शौनकउवाच-
कथयस्वमहाप्राज्ञपुत्रहीनोजनोभवेत्
कर्मणाकेनवैसूतपुत्रोभवतिकेनच १
सूतउवाच-
एतत्पृष्टःपुराब्रह्मानारदेनमहात्मना
सयदाहतदातंचशृणुष्वमुनिपुंगव २
नारदउवाच-
पितामहमहाप्राज्ञसर्वतत्त्वार्थपारग
अपुत्रोवैभवेन्मर्त्यःकर्मणाकेनपद्मज ३
वंध्यास्त्रीवाभवेत्केनवृजिनेनममाग्रतः
कथयशृण्वतोवैमेसर्वप्राणिहितेरत ४
दुहिताजायतेकेनकर्मणावानपुंसकः
मृतवत्सोभवेत्केनमृतवत्सातिदुःखिता
केनपुण्येनभोब्रह्मन्पुनःपुत्रोभवेद्वद ५
ब्रह्मोवाच-
कथयामिसमासेनसावधानेनतच्छृणु
वृत्तांतंपृच्छसित्वंवैशृण्वतांविस्मयप्रदम् ६
पूर्वजन्मनियोमर्त्योवर्तन्नंब्राह्मणस्यच
हरेद्वाहारयेदत्रपुत्रहीनोभवेत्किल ७
इहजन्मनियोमर्त्यःपुराणश्रवणंहिच
ससस्याभूमेर्दानंचकुर्याद्वैश्रद्धयान्वितः ८
धेनुंबहुगुणांहैमींबहुदुग्धांसदक्षिणाम्
सुवर्णप्रतिमांचैवतस्यपुत्रोभवेद्ध्रुवम् ९
पूर्वजन्मनियानारीपरबालकघातनम्
करोतिकपटेनैवबालहीनाभवेद्ध्रुवम् १०

सौवर्णप्रतिमादानंयानारीश्रद्धयान्विता
कुर्यात्पानंब्राह्मणस्यभक्त्यावैचरणोदकम् ११
पुराणश्रवणंचैवदद्याद्वैबहुदक्षिणाम्
बह्वपत्याजीववत्साभवेन्नास्त्यत्रसंशयः १२
जलेनिमग्नंबालंयोदृष्ट्वायानसमुद्धरेत्
इहजन्मन्यपुत्रोवैसाऽपुत्रीचभवेद्ध्रुवम् १३
वृषभंचैवकूष्मांडंससुवर्णंसवस्त्रकम्
दद्याद्दानंब्राह्मणस्यकुर्याद्बालव्रतंशुभम् १४
गौरींकन्यांतथाकुर्यात्पुराणश्रवणंहियः
पुत्रोवैजायतेतस्यसर्वपातकनाशनम् १५
पूर्वजन्मनियोमर्त्योनिराशंचातिथिंद्विज
कुर्यात्क्रोधेनदंडंचपुत्रहीनोभवेद्ध्रुवम् १६
ब्राह्मणंचातिथिंचैवकुर्याद्भक्त्याप्रपूजनम्
अन्नदानंजलंचैवतथादेवालयंशभम् १७
पूर्वजन्मनियानारीभ्रूणहत्यांचयोनरः
कुर्यात्सामृतवत्साचमृतवत्सोभवेद्ध्रुवम् १८
यानारीस्वामिसहिताकुर्याच्चहरिवासरम्
सुपुत्राभर्तृसुभगाभवेत्साप्रतिजन्मनि १९
योनरोगोधनंकुर्याच्छूद्रःकुर्याद्विमोहितः
ब्राह्मणीहरणंवापिकर्मणासनपुंसकः २०
इदंतुवृजिनंकृत्वापश्चात्पुरायंकरोतियः
इहपुरायप्रभावेणदुहिताजायतेद्विज २१
आसीत्त्रेतायुगेराजाश्रीधरोनामतोद्विज
अपुत्रोधनवांस्तस्यजायाहेमप्रभावती २२
व्यासंसकलशास्त्रज्ञंसर्वलोकहितैषिणम्
आगतंचैवपप्रच्छचापुत्रोऽहकथंद्विज २३
उवाचनृपतेःश्रुत्वावचनंविनयान्वितम्
राज्ञादत्तेचपीठेचनिर्मितेकनकादिभिः २४
राजाराज्ञीतस्यपादौधौतंकृत्वाचहर्षितौ
पीत्वापादोदकंद्वौचसर्वपातकनाशनम् २५

व्यासउवाच-
राजन्शृणुष्वयत्पृष्टमपुत्रोयेनकर्मणा
तवेयंराज्ञीचापुत्रीचैकपत्नीव्रतस्तथा २६
पूर्वजन्मनिचंद्रस्त्वंनाम्नावरतनुस्मृतः
भार्यातवापिशुभ्रांगीनाम्नावैशंकरीस्मृता २७
एकदापथियातौचनीचपुत्रंजलेपिच
मग्नंदृष्ट्वाहेलयाचगतौसपंचतांगतः २८
बहुपुण्यप्रभावेणराज्ञीराजागतौयुवाम्
तेनकर्मविपाकेनयुवायोर्नभवेत्सुतः २९
राजोवाच-
इदानींकेनपुण्येनसुतोवैजायतेप्रभो
अपुत्रस्यमनुष्याणांजीवनंहिनिरर्थकम् ३०
व्यासउवाच-
सवस्त्रंचैवकूष्मांडंवृषभंससुवर्णकम्
देहिदानंब्राह्मणस्यकुरुबालव्रतंतथा ३१
गौरींकन्यांतथादेहिपुराणश्रवणंकुरु
पुत्रोवैजायतेतत्रसर्वपातकनाशनम् ३२
ब्रह्मोवाच-
इतिश्रुत्वाततोराजाव्यासोक्तंदानमुत्तमम्
पुराणश्रवणंचैवचकारगतकिल्बिषः ३३
ततःपुत्रोवर्षमध्येबभूवसर्वपूजितः
अभूद्राजासार्वभौमःसुंदरःकुलनायकः ३४
सूतउवाच-
यइदंशृणुयाद्भक्त्याकरोतिदानमुत्तमम्
अपुत्रोलभतेपुत्रंसंक्षेपात्कथितंमया ३५
भक्त्याश्रुत्वातुयानारीकुर्याद्ब्राह्मणपूजनम्
सुपुत्रासाभवेन्नित्यंशास्त्रोक्तविधिनाद्विज ३६
सुवर्णंरजतंवस्त्रंपुष्पमाल्यंचचंदनम्
योदद्यात्पुस्तकेभक्त्यासर्वपापप्रणाशनम् ३७
पूर्वजन्मनियोमूढोब्रह्मबालकघातकः

तस्यक्रूरोभवेत्पुत्रःसप्तजन्मांतरैर्द्विजः ३८
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेब्रह्मनारदसंवादेकर्मविपाककथनं
नामपंचमोऽध्यायः ५

षष्ठोऽध्यायः

शौनकउवाच-
केनपुण्येनभोसूतवैकुंठंसमावाप्यते
तद्वदस्वशृण्वतोमेपोतोहिभवसागरे १
सूतउवाच-
साधुसाधुमुनिश्रेष्ठसर्वमंगलकारक
कथयामिसमासेनशृण्वतांपापनाशनम् २
विष्णवेब्राह्मणायैवमृदावेश्मविनिर्मितम्
योवैदद्याद्द्विजश्रेष्ठतस्यपुण्यंनिशामय ३
विष्णुलोकेचसविप्रःसर्वपापविवर्जितः
सौधवासीभवेन्नित्यंविष्णुलोकेप्रपूज्यते ४
विष्णवेसौधगेहंयोदद्याद्वैब्राह्मणायच
हरेर्न्निकेतनंप्राप्यस्वर्गवासीभवेद्ध्रुवम् ५
अंतेविष्णुपुरंगत्वायुक्तःकोटिकुलैर्द्विज
स्वर्णसौधेगृहेस्थित्वाकुर्याद्भोगंयथासुखम् ६
ब्राह्मणस्थापनेपुण्यंयद्वैभवतिभोमुने
संख्यांकर्तुमशक्तस्तुतद्वेधाःसर्वकारकः ७
गण्यंतेरेणवश्चैवगण्यंतेवृष्टिबिंदवः
नगण्यंतेविधात्रापिब्रह्मसंस्थापनेफलम् ८
नारदेनपुराब्रह्मापृष्टःसंसारसंभवः
वेधास्तंकथयामासतच्छृणुष्वमहामुने ९
पुरासीद्द्वापरेब्रह्मन्वारनारीसुशोभना
सुकेशीहरिणीनेत्रासुमध्याचारुहासिनी १०
नाम्नासाचंचलापांगीययौदेशांतरंकदा
सर्वपापसमायुक्तानरकेपातयंतिच ११
संगेनसिंधुनाकांचीजनान्देवालयंगता

तत्रक्षणंसोपविष्टातांबूलभक्षणंकृतम् १२
शेषंचूर्णंसौधभित्तौदत्वानिम्नेकुतूहलात्
ततोगताजारकांक्षीधनार्थंनगरंप्रति १३
जारेणकेनचित्सार्द्धंसंकेतःसहसाकृतः
संकेतंतुगतावेश्यावनंरात्रौविमोहिता १४
संकेतंनागतोवैश्योव्यशंकिष्टविलोकिता
कथंकांतोनागतोमेसर्पव्याघ्रैश्चभक्षितः १५
संकेतनंकथंहित्वागतःकिंकामविह्वलः
अन्ययाज्ञातयासार्द्धमभिलाषीभवेत्किमु १६
परामृष्यैतदहृद्यंतःकोटपालभयाद्द्विज
नगरंनागतासाहिरुद्धेलोकपथेतमैः १७
एतस्मिन्नंतरेव्याघ्रःकामरूपीबलात्क्षुधी
प्रेषितःकालदेवेनाग्रसदागत्यतांद्विज १८
ततस्तुयमुनाभ्रातुर्दूतास्तेभीमवर्षिणः
आगतागिरिकूटांगानेतुंतांपापकर्मणा १९
वक्रपादावक्रमुखाउन्नासाबहुदंष्ट्रिणः
चर्मरज्जूर्मुद्गरांश्चगृहीत्वापांशुलांद्विज २०
बंधयामासुरुन्मत्तागणिकांचर्म्मरज्जुभिः
शंखचक्रगदापद्मधारिणोवनमालिनः २१
प्रेषितादेवदेवेनतद्भक्तवत्सलेनच
कृष्णजीमूतसंकाशाःस्फुरद्वदनपंकजाः २२
श्रेणीधराश्चारुनासादिव्यकुंडलभूषिताः
ददृशुःपथिगच्छंतोविष्णोर्दूतामहात्मनः २३
विष्णुदूताऊचुः-
केयूयंविकृताकारालक्ष्यंतेकर्बुराइव
इमांविष्णोःप्रियतमांनीत्वाक्वव्रजथोत्तमाम्
इदंवचनमाकर्ण्यतेषांतेतुद्रुतंययुः २४
अथतेक्रोधसंपन्नाविष्णोर्दूतामहाबलाः
जघ्नुस्तेसंदेशहरान्यमस्यजगतःप्रभोः २५
चक्रादिशस्त्रसंघैश्चसूर्यकोटिसमप्रभैः

कृतांतस्यभटाःसर्वेरुदंतस्तेपलायिताः २६
यमंप्रोचुःसभीताश्चवृत्तांतंसकलंद्विज
यमोऽपितत्कथांश्रुत्वाचित्रगुप्तमुवाचह २७
धर्मउवाच-
केनपुरायेनभोमंत्रिन्वेश्यामुक्तिंसमागता
एतन्मेपृच्छतसर्वंकथयस्वयथार्हतः २८
चित्रगुप्तउवाच-
तयापापान्यर्जितानिजन्मतःसुबहून्यपि
किंत्वाकर्णयलोकेशयदिस्यात्पुरायमस्तितत् २९
गणिकैकदाधर्म्मराजसर्वालंकारभूषिता
कांचित्पुरींजगामाशुजारकांक्षीधनार्थिनी ३०
तत्रदेवालयेतस्मिन्स्थित्वातांबूलभक्षणं
कृत्वातच्छेषचूर्णंतुददौभित्तौतुकौतुकात् ३१
तेनपुरायप्रभावेणगणिकागतपातका
वैकुंठंप्रतिसायातिनिर्गतातवदंडतः ३२
सूतउवाच-
इतिश्रुत्वाततोदूतायमोऽपिवचनंद्विज
व्यापारेचान्यतश्चित्तंददौसागणिकापिच ३३
आरूढास्यंदनेदिव्येराजहंसयुतेतथा
विष्णुलोकंययौसाचवेष्टिताविष्णुकिंकरैः ३४
श्रीविष्णोराज्ञयासाथकुलकोटियुतापिच
तस्थौसौधगृहेविप्रनानाभोगंचकारह ३५
भक्त्यायोवैहरेर्गेहेदद्याच्चूर्णंप्रयत्नतः
पुरायंकिंवाभवेत्तस्यनजानेद्विजपुंगव ३६
भक्त्याध्यायंपठेद्योवैशृणोतिसादरेणच
सर्वपापविनिर्मुक्तोयात्यसौहरिमंदिरम् ३७

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेब्रह्मनारदसंवादेषष्ठोऽध्यायः ६

सप्तमोऽध्यायः

शौनकउवाच-

कथयस्वमहाप्राज्ञगोलोकंयातिकर्मणा
सुमतेदुस्तरात्केनजनःसंसारसागरात्
राधायाश्चाष्टमीसूततस्यामाहात्म्यमुत्तमम् १
सूतउवाच-
ब्रह्माणंनारदोऽपृच्छत्पुराचैतन्महामुने
तच्छृणुष्वसमासेनपृष्टवान्सइतिद्विज २
नारदउवाच-
पितामहमहाप्राज्ञसर्वशास्त्रविदांवर
राधाजन्माष्टमीतातकथयस्वममाग्रतः ३
तस्याःपुण्यफलंकिंवाकृतंकेनपुराविभो
अकुर्वतांजनानांहिकिल्बिषंकिंभवेद्द्विज ४
केनैवतुविधानेनकर्त्तव्यंतद्व्रतंकदा
कस्माज्जाताचसाराधातन्मेकथयमूलतः ५
ब्रह्मोवाच-
राधाजन्माष्टमींवत्सशृणुष्वसुसमाहितः
कथयामिसमासेनसमग्रंहरिणाविना ६
कथितुंतत्फलंपुण्यंनशक्नोत्यपिनारद
कोटिजन्मार्जितंपापंब्रह्महत्यादिकंमहत् ७
कुर्वंतियेसकृद्भक्त्यातेषांनश्यतितत्क्षणात्
एकादश्याःसहस्रेणयत्फलंलभतेनरः ८
राधाजन्माष्टमीपुण्यंतस्माच्छतगुणाधिकम्
मेरुतुल्यसुवर्णानिदत्वायत्फलमाप्यते ९
सकृद्राधाष्टमींकृत्वातस्माच्छतगुणाधिकम्
कन्यादानसहस्रेणयत्पुण्यंप्राप्यतेजनैः १०
वृषभानुसुताष्टम्यातत्फलंप्राप्यतेजनैः
गंगादिषुचतीर्थेषुस्नात्वातुयत्फलंलभेत् ११
कृष्णप्राणप्रियाष्टम्याःफलंप्राप्नोतिमानवः
एतद्व्रतंतुयःपापीहेलयाश्रद्धयापिवा १२
करोतिविष्णुसदनंगच्छेत्कोटिकुलान्वितः
पुराकृतयुगेवत्सवरनारीसुशोभना १३

सुमध्याहरिणीनेत्राशुभांगीचारुहासिनी
सुकेशीचारुकर्णीचनाम्नालीलावतीस्मृता १४
तयाबहूनिपापानिकृतानिसुदृढानिच
एकदासाधनाकांक्षीनिःसृत्यपुरतःस्वतः १५
गतान्यनगरंतत्रदृष्ट्वासुज्ञजनान्बहून्
राधाष्टमीव्रतपरान्सुंदरेदेवतालये १६
गंधपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफलैः
भक्तिभावैःपूजयंतोराधायामूर्तिमुत्तमाम् १७
केचिद्गायंतिनृत्यंतिपठंतिस्तवमुत्तमम्
तालवेणुमृदंगांश्चवादयंतिचकेमुदा १८
तांस्तांस्तथाविधान्दृष्ट्वाकौतूहलसमन्विता
जगामतत्समीपंसापप्रच्छविनयान्विता १९
भोभोःपुण्यात्मानोयूयंकिंकुर्वंतोमुदान्विताः
कथयध्वंपुण्यवंतोमांचैवविनयान्विताम् २०
तस्यास्तुवचनंश्रुत्वापरकार्यहितेरताः
आरेभिरेतदावक्तुंवैष्णवाव्रततत्पराः २१
राधाव्रतिनऊचुः-
भाद्रेमासिसिताष्टम्यांजाताश्रीराधिकायतः
अष्टमीसाद्यसंप्राप्तातांकुर्वामप्रयत्नतः २२
गोघातजनितंपापंस्तेयजंब्रह्मघातजम्
परस्त्रीहरणाच्चैवतथाचगुरुतल्पजम् २३
विश्वासघातजंचैवस्त्रीहत्याजनितंतथा
एतानिनाशयत्याशुकृतायाचाष्टमीनृणाम् २४
तेषांचवचनंश्रुत्वासर्वपातकनाशनम्
करिष्याम्यहमित्येवपरामृष्यपुनःपुनः २५
तत्रैवव्रतिभिःसार्द्धंकृत्वासाव्रतमुत्तमम्
दैवात्सापंचतांयातासर्पघातेननिर्मला २६
ततोयमाज्ञयादूताःपाशमुद्गरपाणयः
आगतास्तांसमानेतुंबबंधुरतिकृच्छ्रतः २७
यदानेतुंमनश्चक्रुर्यमस्यसदनंप्रति

तदागताविष्णुदूताःशंखचक्रगदाधराः २८
हिरण्मयंविमानंचराजहंसयुतंशुभम्
छेदनंचक्रधाराभिःपाशंकृत्वात्वरान्विताः २९
रथेचारोपयामासुस्तांनारींगतकिल्बिषाम्
निन्युर्विष्णुपुरंतेचगोलोकाख्यंमनोहरम् ३०
कृष्णेनराधयातत्रस्थितावृतप्रसादतः
राधाष्टमीव्रतंतातयोनकुर्य्याच्चमूढधीः ३१
नरकान्निष्कृतिर्नास्तिकोटिकल्पशतैरपि
स्त्रियश्चयानकुर्वंतिव्रतमेतच्छुभप्रदम् ३२
राधाविष्णोःप्रीतिकरंसर्वपापप्रणाशनम्
अंतेयमपुरींगत्वापतंतिनरकेचिरम् ३३
कदाचिज्जन्मचासाद्यपृथिव्यांविधवाध्रुवम्
एकदापृथिवीवत्सदुष्टसंघैश्चताडिता ३४
गौर्भूत्वाचभृशंदीनाचाययौसाममांतिकम्
निवेदयामासदुःखंरुदंतीचपुनःपुनः ३५
तद्वाक्यंचसमाकर्ण्यगतोऽहविष्णुसंनिधिम्
कृष्णेनिवेदितश्चाशुपृथिव्यादुःखसंचयः ३६
तेनोक्तंगच्छभोब्रह्मन्देवैःसार्द्धंचभूतले
अहंतत्रापिगच्छामिपश्चान्ममगणैःसह ३७
तच्छ्रुत्वासहितोदैवैरागतःपृथिवीतलम्
ततःकृष्णःसमाहूयराधांप्राणगरीयसीम् ३८
उवाचवचनंदेविगच्छेहंपृथिवीतलम्
पृथिवीभारनाशायगच्छत्वंमर्त्यमंडलम् ३९
इतिश्रुत्वापिसाराधाप्यागतापृथिवींततः
भाद्रेमासिसितेपक्षेअष्टमीसंज्ञिकेतिथौ ४०
वृषभानोर्यज्ञभूमौजातासाराधिकादिवा
यज्ञार्थंशोधितायांचदृष्टासादिव्यरूपिणी ४१
राजानंदमनाभूत्वातांप्राप्यनिजमंदिरम्
दत्तवान्महिषींनीत्वासाचतांपर्यपालयत् ४२
इतितेकथितंवत्सत्वयापृष्टंचयद्वचः

गोपनीयंगोपनीयंगोपनीयंप्रयत्नतः ४३
सूतउवाच-
यइदंशृणुयाद्भक्त्याचतुर्वर्गफलप्रदम्
सर्वपापविनिर्मुक्तश्चांतेयातिहरेर्गृहम् ४४

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेब्रह्मनारदसंवादेश्रीराधाष्टमीमाहात्म्यं
नामसप्तमोऽध्यायः ७

अष्टमोऽध्यायः

शौनकउवाच-
समुद्रमथनंसूतपुराकस्मात्कृतंगुरो
हृदयेकौतुकंजातंश्रोतुंमेवदचामरैः १
सूतउवाच-
ब्रह्मन्वच्मिसमासेनसिंधोर्मथनकारणम्
दुर्वाससेंद्रसंवादमितिहासंशृणुष्वतत् २
महातपामहातेजादुर्वासाईश्वरांशजः
ब्रह्मर्षिःप्रययौस्वर्गमिन्द्रंद्रष्टुंसचैकदा ३
तस्मिन्ददर्शकालेतंगजारूढंशचीपतिम्
दृष्ट्वास्रजंपारिजातांददौतस्मैमहामुनिः ४
गृहीत्वातांस्रजंचेंद्रोविन्यस्यगजमूर्द्धनि
देवराट्प्रययौब्रह्मन्ससैन्योनंदनंप्रति ५
हस्तीचादायतांमालांछित्त्वातुधरणीतले
चिक्षेपचमहाक्रुद्धस्तमित्याहमहामुनिः ६
त्रैलोक्यैकश्रियायुक्तोयस्मात्त्वमवमन्यसे
तवत्रैलोक्यश्रीर्नष्टाभवत्येवनसंशयः ७
ततःशक्रोजगामाशुसुप्तश्चस्वपुरंपुनः
ददर्शजगतांमाताचांतर्द्धानंगतास्वयम् ८
नष्टमंतर्द्धानवत्यांतदातस्यांजगत्त्रयम्
क्षुत्पिपासान्विताःसर्वेचुक्रुशुर्वैनिरंतरम् ९
नववर्षुर्वारिवाहाःशुष्काश्चैवजलाशयाः
सर्वेतेशाखिनःशुष्काःफलपुष्पविवर्जिताः १०

क्षुत्पिपासार्दिताःसर्वेब्रह्मणःसन्निधिंययुः
तंसर्वेकथयामासुःदुःखशोकंपितामहम् ११
देवानांवचनंश्रुत्वाधातादेवगणैःसह
भृग्वादिमुनिभिश्चैवप्रययौक्षीरसागरम् १२
विष्णुंसमर्चयामासक्षीराब्धेरुत्तरेतटे
मंत्रमष्टाक्षरंवेधाजपन्ध्यायन्जगत्पतिम् १३
ततःप्रसन्नोभगवान्सर्वेषांचदिवौकसाम्
वैनतेयंसमारुह्यचागतःसदयःप्रभुः १४
पीतवस्त्रंचतुर्बाहुंशंखचक्रगदाधरम्
दृष्ट्वातंजगतामीशंपुंडरीकनिभेक्षणम् १५
विष्णुंभवोदधेःपोतंवनमालाविभूषितम्
श्रीवत्सकौस्तुभोरस्कमानंदाश्रुपरिप्लुताः १६
तुष्टुवुर्जयशब्देननमश्चक्रुर्निरंतरम्
श्रीभगवानुवाच-
वरंवृणीध्वंभोदेवाःकस्माद्यूयंसमागताः
वरदोऽस्मितद्वदतवोददामिचनान्यथा १७
देवाऊचुः-
कृपालोब्रह्मशापेनसंपद्धीनंजगत्त्रयम्
क्षुत्पिपासार्दितंनाथसदेवासुरमानुषम् १८
रक्षसर्वानिमाँल्लोकान्याताःस्मशरणंतव
श्रीभगवानुवाच-
इंदिराब्रह्मशापेनचान्तर्द्धानंगतासुराः १९
यस्याःकटाक्षमात्रेणजगदैश्वर्यसंयुतम्
तदायूयंसुराःसर्वेचोत्पाट्यस्वर्णपर्वतम् २०
मंदरंघर्घरंकृत्वासर्पराजेनवेष्टितम्
कुरुध्वंमथनंदेवाःसदैत्याःक्षीरसागरम् २१
तस्मादुत्पत्स्यतेलक्ष्मीर्जगन्माताचभोःसुराः
तयादृष्टामहाभागाभविष्यथनसंशयः २२
धारयाम्यहमेवाद्रिंकूर्मरूपेणसर्वतः
इत्युक्त्वाभगवान्विष्णुरंतर्द्धानंजगामसः

जग्मुःसुरासुराःसर्वेसमुद्रमथनंद्विज २३
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसमुद्रमथनोद्योगोनामाष्टमोऽध्यायः ८

नवमोऽध्यायः

सूतउवाच–
ततोऽमरगणास्तेचसगंधर्वाःसदानवा
उत्पाट्यमंदरंशैलंचिक्षिपुःपयसांनिधौ १
ततःसनातनःश्रीमान्दयालुर्जगदीश्वरः
अधारयद्गिरेर्मूलंकूर्मरूपेणपृष्ठतः २
अनंतंतत्रसंवेष्ट्यममंथुर्दुग्धसागरम्
एकादश्यांमथ्यमानेचोद्भूतंप्रथमंद्विज ३
कालकूटविषंतेतुदृष्ट्वासर्वेप्रदुद्रुवुः
ततस्तान्विद्रुतान्दृष्ट्वाशंकरश्चोक्तवानिदम् ४
भोभोऽमरगणायूयंविषंकुरुतमादरम्
वारयिष्याम्यहंतूर्णंकालकूटंमहाविषम् ५
इत्युक्त्वापार्वतीनाथोध्यायन्नारायणंहृदि
महामंत्रंसमुच्चार्यविषमादद्भयंकरम् ६
महामंत्रप्रभावेणविषंजीर्णंगतंमहत्
अच्युतानंतगोविंदइतिनामत्रयंहरेः ७
योजपेत्प्रयतोभक्त्याप्रणवाद्यंनमोंऽतिकम्
विषभोगाग्निजंतस्यनास्तिमृत्योर्भयंतथा ८
ततोहृष्टमनादेवाममंथुःक्षीरसागरम्
ततोऽलक्ष्मीःसमुत्पन्नाकालास्यारक्तलोचना ९
रूक्षपिंगलकेशाचजरतींबिभ्रतीतनुम्
साचज्येष्ठाब्रवीद्देवान्किंकर्तव्यंमयेतिवै १०
देवास्तथाब्रुवंस्तांचदेवींदुःखस्यभाजनम्
येषांनृणांगृहेदेवीकलहःसंप्रवर्तते ११
तत्रस्थानंप्रयच्छामोवसज्येष्ठेशुभान्विता
निष्ठुरंवचनंयेचवदंतियेऽनृतंनराः १२
संध्यायांयेहिचाश्नंतिदुःखदातिष्ठतद्गृहे

कपालकेशभस्मास्थितुषांगाराणियत्रतु १३
स्थानंज्येष्ठेतत्रतवभविष्यतिनसंशयः
अकृत्वापादयोर्धौतंयेचाश्नंतिनराधमाः १४
तद्गृहेसर्वदातिष्ठदुःखदारिद्रदायिनी
वालुकालवणांगारैःकुर्वंतिदंतधावनम् १५
तेषांगेहेसदातिष्ठदुःखदाकलिनासह
छत्राकंश्रीफलंशिष्टंयेखादंतिनराधमाः १६
गेहेतेषांतवस्थानंज्येष्ठेकलुषदायिनि
तिलपिष्टमलाबुंयेगृंजनंपोतिकादलम् १७
कलंबुकंपलांडुंयेचाश्नंतिपापबुद्धयः
तेषांगृहेतवस्थानंभविष्यतिनसंशयः १८
गुरुदेवातिथीनांचयज्ञदानविवर्जितम्
यत्रवेदध्वनिर्नास्तितत्रतिष्ठसदाऽशुभे १९
दंपत्योःकलहोयत्रपितृदेवार्चनंनवै
दुरोदररतायत्रतत्रतिष्ठसदाशुभे २०
परदाररतायत्रपरद्रव्यापहारिणः
विप्रसज्जनवृद्धानांयत्रपूजानविद्यते
तत्रस्थानेसदातिष्ठपापदारिद्र्यदायिनी २१
इत्यादिश्यसुराज्येष्ठांसर्वेषांकलिवल्लभाम्
क्षीराब्धेर्मथनंचक्रुःपुनस्तेसुसमाहिताः २२

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेसमुद्रमथनं
नामनवमोऽध्यायः ९

दशमोऽध्यायः

सूतउवाच-
एरावतस्ततोजज्ञेतथैवोच्चैःश्रवाहयः
धन्वंतरिःपारिजातःसुरभिश्चाप्सरोदयः १
ततःप्रभातसमयेद्वादश्यामुदितेरवौ
उत्पन्नाश्रीर्महालक्ष्मीःसर्वलक्षणशोभिता २
ददृशुस्तांमहादेवींमातरंधर्मदेवताः

प्रहृष्टाःसर्वजंतूनांश्रीकृष्णहृदयालयाम् ३
लक्ष्मीभ्राताशीतरश्मिर्जातश्चसुधयाततः
उत्पन्नासाहरेर्जायातुलसीलोकपावनी ४
तंशैलंपूर्ववत्स्थाप्यपरिपूर्णमनोरथाः
समेत्यमातरंस्तुत्वाजेपुःश्रीसूक्तमुत्तमम् ५
ततःप्रसन्नासादेवीसर्वान्देवानुवाचह
वरंवृणीध्वंभद्रंवोवरदाहंसुरोत्तमाः ६
देवाऊचुः-
प्रसीदकमलेदेविसर्वमातर्हरिप्रिये
त्वयाविनाजगच्छून्यंकुरुप्राणप्ररक्षणम् ७
इत्युक्तासामहालक्ष्मीःप्राहनारायणप्रिया
इदानींसर्वजंतूनांप्राणरक्षांकरोम्यहम् ८
ततोनारायणःश्रीमाञ्छंखचक्रगदाधरः
आविर्बभूवसहसादयालुर्जगदीश्वरः ९
ततस्तेतुष्टुवुर्देवाःप्रणम्यजगतांपतिम्
कृतांजलिपुटाःप्रोचुःहर्षगद्गदभाषिणः १०
गृहाणमातरंविष्णोमहिषींवल्लभांतव
संसाररक्षणार्थायलक्ष्मीमनपगामिनीम्
यावत्प्रतिज्ञांनोचक्रेतावत्प्राहेंदिराहरिम् ११
लक्ष्मीरुवाच-
अविवाह्यकथंज्येष्ठामलक्ष्मींमधुसूदन
तस्याःकनिष्ठांमांनाथविवाहंकर्तुमिच्छसि
ज्येष्ठायांचस्थितायांवैकनिष्ठापरिणीयते १२
सूतउवाच-
इति श्रुत्वाततोविष्णुर्ददौचोद्दालकायच
वेदवाक्यानुरूपेणह्यलक्ष्मींनिजैःसह १३
ततोनारायणःश्रीमान्लक्ष्मीमंगीचकारह
ततःसुरगणाःसर्वेनमश्चक्रुःपुनःपुनः १४
अथतेचासुरान्सर्वान्जघ्नुःसर्वेबलाधिकाः
सर्वेतेक्रंदमानाश्चगताश्चैवदिशोदश १५

सुधांतत्खादितुंचक्रुर्देवाःपंक्तिंयथाक्रमम्
श्रीविष्णोराज्ञयासर्वेचोचुश्चैवपरस्परम् १६
त्वंचदेहित्वंचदेहित्वंचदेहीतिचाब्रुवन्
नशक्तोऽस्मिनशक्तोऽस्मिनशक्तोऽस्मीतिचाब्रुवन् १७
ततोविष्णुःसमुत्तस्थौस्त्रीरूपंचदधारह
चकारस्वर्णपात्रेतत्पीयूषपरिवेषणम् १८
पीयूषभक्षणंराहुर्यावत्कुर्याद्द्विजोत्तम
चंद्रसूर्यौचोक्तवंतौराक्षसोऽसौछलागतः १९
ततःक्रुद्धोजगन्नाथोजघानस्वर्णपात्रतः
शिरस्तस्यपपातोर्व्यांकेतुर्नाम्नाबभूवह २०
राहुकेतूततस्तूर्णंगतौतौभयविह्वलौ
इदानींतद्दिनेप्राप्तेचंद्रसूर्यौसयुध्यति २१
कुर्याद्ग्रासंसैंहिकेयस्तत्क्षणंदुर्लभंभवेत्
सर्वंगंगासमंतोयंवेदव्याससमाद्विजाः २२
स्नानंवायसतीर्थेयोगंगास्नानफलंलभेत्
दानमक्षयपुण्यंस्यात्कोटिजन्मार्जितंतथा २३
पापंनश्येत्समूलंचकिंपुनःक्रतुकोटिभिः
विद्यार्थीलभतेविद्यांपुत्रार्थीपुत्रमाप्यते २४
मोक्षार्थीलभतेमोक्षंमंत्रसिद्धिर्भवेद्ध्रुवम्
इतितेकथितंविप्रसमुद्रमथनंतुतत् २५

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकादिकसंवादेसमुद्रमथनं नामदशमोऽध्यायः १०

एकादशोऽध्यायः

शौनकउवाच-
इदानींश्रोतुमिच्छामिकथयस्वयथार्थतः
हरिस्वरूपिणासाक्षाद्वेदव्यासेनशासित १
निरहंकारहेसूतलोकानुग्रहकारक
केनस्यात्सुभगानारीपापिनीचसुदुर्भगा २
पतिप्रियांगकेनस्याद्रूपिताचक्षुषोःसुधा

केनवाजायतेलद्मीस्तन्मेब्रूहितपोधन ३
सूतउवाच-
यदिपुरायमिदंविप्रवृत्तंपरमदुर्लभम्
शृणुष्वभोःसमासेनकथयामिविधानतः ४
स्रासीद्भद्रश्रवाराजायुगेद्वापरसंज्ञके
सौराष्ट्रदेशवासीचवेदवेदांगपारगः ५
भार्यातस्यचसंजातानाम्नासुरतिचंद्रिका
तस्यांबभूवुःश्रीराज्ञःसप्तपुत्रामनोरमाः ६
ततोऽभिजातादुहितासुंदरीसत्यवादिनी
श्यामबालाचविप्रेंद्रनाम्नाप्रीतिकरीपितुः ७
स्रथैकदाश्यामबालासुवर्णसिकतासुच
गूढैर्मनोहरैरत्नैःसखिभिःक्रीडितुंमुदा ८
जगामनीपवृद्मस्यतलंपरमदुर्लभम्
एतस्मिन्नंतरेविप्रलद्मीःसंसारतारिणी ९
लोकानांनीतिदासाथसमायातास्वयंपुरः
धृत्वाचब्राह्मणीरूपंपलितांगीचभूसुर १०
स्रखिलानांचलोकानांशास्तूराज्ञःद्मयंविना
केषांद्मुद्रतराणांहिगृहेगच्छामिसांप्रतम् ११
इतिसंचिंत्यमनसागताराजनिकेतनम्
सुवर्णभित्तिभिर्युक्तंपताकाभिरलंकृतम् १२
सिंहद्वारमतिक्रम्यप्राहदौवारिकींततः
द्वारंजहिहिभोद्वारिनियुक्तेशुभलद्मणे १३
यामिवेगेनपश्यामिराज्ञींसुरतिचंद्रिकाम्
तच्छ्रुत्वावचनंतस्यारत्नदंडकराचसा
कोकिलावाक्यवन्मुक्तंपरमंहर्षमाययौ १४
द्वारनियुक्तोवाच-
किंनामवहसेवृद्धेकःपतिस्तावकःपुनः
स्रागतासिकथंकिंतेकार्य्यंराज्ञ्याश्चदर्शने
कस्मात्किंब्रूहिविप्रेत्वंश्रोतुंकौतुहलंहिमे १५
वृद्धोवाच-

शृणुपोष्येमहाराजपत्न्यादंडकरेयदा
श्रोतुंकौतूहलंतेऽस्तिमदागमनकारणम् १६
प्रसिद्धाकमलानाम्नाचाहंप्राणेश्वरोमम
भुवनेशइतिख्यातोनाम्नाद्वारवतीपुरी १७
तस्यांवैवर्त्ततेपोष्येममप्राणेश्वरस्ततः
आगताहंरत्नवेत्रकरेशृणुसकौतुकम् १८
ममागमनकार्यंहिवक्ष्मीदानींतवाग्रतः
पुरासीद्वैश्यकुलजाराज्ञीतवचदुःखिनी १९
एकस्मिन्दिवसेपोष्येपतिनाकलहःकृतः
तयानार्याचदुःखिन्याततोवैभर्तृपीडिता २०
बहिर्भूयद्रुतंगेहाद्रुदंतीचपुनःपुनः
तस्याश्चरोदनंश्रुत्वाचागताहंसमीपतः २१
अपृच्छंसर्ववृत्तांतंकथितोवैयथार्थतः
तयाततोव्रतवरमुपदेशंददाम्यहम् २२
ममोपदेशतःसावैचक्रेव्रतवरंमुदा
तस्यप्रसादाद्धोद्वाःस्थेसंजातासुखिताचसा २३
कदाचिद्वैश्यकुलजापत्यामृत्योर्वशंगता
समानेतुंततस्तौतुविहिताखिलघातकौ २४
किंकरान्प्रेषयामासचंडाद्यान्धर्मराट्प्रभुः
यमाज्ञयासमायातायमदूताभयंकराः २५
बद्ध्वातौचर्मपाशेनलोहमुद्गरपाणयः
उद्यमंचक्रिरेगंतुंयमस्यशरणंप्रति २६
अत्रांतरेचलक्ष्म्यास्तेदूताविष्णुपरायणाः
समानेतुंसमायाताःशंखचक्रगदाधराः २७
दृष्ट्वातथाविधांस्तांश्चयमदूताःपलायिताः
लक्ष्मीदूतामहात्मानःस्वप्रकाशादयस्तथा २८
पाशंछित्त्वासमारोप्यराजहंसयुतेरथे
जग्मुर्लक्ष्मीपुरंसर्वेसहसाकाशवर्त्मना २९
यावद्द्वारंव्रतवरंकृत्वावैश्याचसातदा
तावत्कल्पसहस्राणितस्थतुःकमलापुरे ३०

पुगयशेषस्यभोगार्थंजातौराजान्वयेऽधुना
व्रतंचविस्मृतौद्वाःस्थेराजसंपत्तिगर्वितौ
तस्माद्व्रतवतस्यापिचोपदेशार्थमागता ३१
द्वाःस्थोवाच-
केनैवतुविधानेनवृद्धेव्रतवरंकृतम्
कस्मिन्मासेव्रतंश्रेष्ठंदेवताकाचपूज्यते ३२
एतन्मेपृच्छतोमातर्यथावद्वक्तुमर्हसि
कमलोवाच-
कार्त्तिकेचव्यतिक्रांतेमार्गशीर्षेसमागते
तस्मिन्मासेचभोपोष्येवासरेगुरुसंज्ञके ३३
ततःपूर्वाह्णसमयेसकलैर्व्रतिभिर्वृता
नारायणेनसहितांलक्ष्मींसंपूजयेत्ततः ३४
मिष्टैःपायसयुक्तैश्चभुक्तैश्चखंडमिश्रितैः
लक्ष्मींसंतोषयेत्प्रेष्येततःसंप्रार्थयेदिदम् ३५
त्रैलोक्यपूजितेदेविकमलेविष्णुवल्लभे
यथात्वमचलाकृष्णेतथाभवमयिस्थिता ३६
ईश्वरीकमलेदेविशरणंचभवानघे
नानोपहारद्रव्यैश्चलक्ष्मीमाज्ञाप्यतोषयेत् ३७
शास्त्रैश्चपूजयेद्देवींमहोत्सवसमन्विताम्
ततोनैवेद्यशेषांश्चदत्वाब्राह्मणसत्तमम् ३८
आत्मानंस्वपतिंपुत्रान्पोष्येऽन्यानपिसेवकान्
द्वितीयेतुगुरोर्वारेविशेषंशृणुसुंदरि ३९
चित्रधूलीप्रशस्तैश्चभ्राष्ट्रैर्गोधूमनिर्मितैः
तोषयेत्कमलादेव्याःकुर्य्याद्वैभक्तिभावतः ४०
तृतीयेखंडसंयुक्तंदध्योदननिवेदनम्
शामाकशालिकासारैश्चतुर्थेपूजयेन्मुदा ४१
लक्ष्मीदेवींप्रयत्नेनरत्नदंडकरेततः
लक्ष्मीदेवीप्रीतयेतुब्राह्मणान्पूजयेद्धनैः ४२
वस्त्रालंकारभोज्यैश्चफलैर्नानाविधैस्तथा
पोष्योवाच-

अत्रैवतिष्ठभोवृद्धेराज्ञींसुरतिचंद्रिकाम् ४३
विज्ञाप्यत्वांनयिष्यामिमाक्रोधंकुरुसत्तमे
इत्युक्त्वासातुचार्वंगीगताराज्ञीसमीपतः ४४
शिरस्यंजलिमाधायपोष्याब्रह्मन्समूलतः
आरभ्यसांगपर्यंतंयदूचेकमलालया ४५
तत्सर्वंकथयामासराज्ञींसुरतिचंद्रिकाम्
द्वारपालीवचःश्रुत्वाराज्ञीसुरतिचंद्रिका ४६
जगामब्राह्मणीपार्श्वंसगर्वाप्राहसुंदरी
राज्ञ्युवाच-
वृद्धेब्राह्मणिकिंवृत्तंचोपदेशार्थमागता ४७
कथयस्वचिरंमह्यंभयंत्यक्त्वायथासुखम्
ब्राह्मण्युवाच-
तवानीतिमहंदृष्ट्वागंतुमिच्छामिचंचला ४८
कथयिष्यामिकिंदुष्टेव्रतंपरमदुर्लभम्
इंदिरावासरेचाद्यचांडालेनकरोषियत् ४९
तद्दृष्टंमयिकादुष्टेतद्गेहेगर्वितेऽधुना
तच्छ्रुत्वाब्राह्मणीवाक्यंक्रोधसंरक्तलोचना ५०
जरंतींब्राह्मणींचैवप्रहारंचचकारसा
ततःसाकमलावृद्धाक्रंदमानापलायिता ५१
क्रीडमानाततःश्यामाब्राह्मणीक्रन्दनध्वनिम्
आगतास्याःसमीपंतुश्रुत्वाबालातपोधना ५२
श्यामाबालोवाच-
वृद्धेव्यथेदृशीकेनदत्तातुभ्यंवदस्वमे
तस्यावचनमाकर्ण्यशोकगद्गदयागिरा ५३
कमलाकथितंसर्ववृत्तांतंद्विजसत्तम
श्यामाबालाततःश्रुत्वाव्रतंपरमदुर्ल्लभम् ५४
शास्त्रोक्तविधिनाचक्रेसश्रद्धंचसभक्तितः
त्रिवारेपरिपूर्णेतुतुर्यवारेसमागते ५५
विवाहकर्मसंसिद्धंद्विजलक्ष्मीप्रसादतः
श्रीसिद्धेश्वरदेवस्यनृपतेर्भूपतेजसः ५६

मालाधरोनामसुतोगृहीत्वातांगृहंगतः
अथतस्यांगतायांतुब्रह्मन्शृणुष्वकौतुकम् ५७
राज्ञीगृहेचसर्वाणिस्थितानिसुबहूनिच
द्रव्याणिकेननीतानिनज्ञातान्यपिभूसुर ५८
निर्वित्ताबुद्धिहीनासाचान्नवस्त्रविवर्जिता
उपविष्टाचकेनापिगंतुंचदुहितुर्गृहम् ५९
प्रेषयामासभर्त्तारंकिंचित्प्रार्थनहेतवे
तस्यमालाधरस्यापिग्रामेचसरसीतटे ६०
कालेनकियताविप्रप्रविवेशचकष्टतः
तस्माज्जलंसमानेतुंतस्यादास्यःसमागताः
तंदृष्ट्वादुःखिनांश्रेष्ठंपप्रच्छुःसानुकंपिताः ६१
दास्यऊचुः-
कस्त्वंकुतःसमायातोमांसरक्तविवर्ज्जितः
रूक्षांगोरूक्षकेशश्चतत्सर्वंकथयस्वनः ६२
दरिद्रउवाच-
श्यामाबालापिताचाहंसौराष्ट्रनगरागतः
कथयध्वंचभोदास्यःश्यामाबालासमीपतः ६३
तच्छ्रुत्वावचनंतस्यकौतूहलसमन्विताः
परस्परमुखाःसर्वाजहसुःस्वपुरंगताः ६४
श्यामाबालाचकथितंसर्वंवृत्तंचभोद्विज
श्रुत्वैतद्वचनंतासांप्रेषयामाससेवकान् ६५
पुष्पतैलंदिव्यवस्त्रंचंदनंपर्णवीटिकाम्
घोटकंचतथादत्वापितरंप्रतिसुंदरी ६६
गत्वाथसर्वेतेभृत्याःकृत्वासुवेषमुत्तमम्
श्यामाबालागृहंनिन्युर्देवराजगृहोपमम् ६७
श्यामाबालाततश्चैवपितरंदुःखिनांवरम्
श्याल्यन्नंसघृतंचैवभोजयामासयत्नतः ६८
तुर्येषुसमतीतेषुदिवसेषुतपोधन
प्रेषयामासतंदत्वागुप्तपात्रस्थितंधनम् ६९
ततःप्रविश्यस्वगृहेधनंपात्रान्तरस्थितम्

ददर्शांगारनिचयंरुरोदभृशदुःखितः ७०
दुहितुःसदनंयातुंनिःससारगृहागतः
तत्रैवसरसीकूलेप्रविवेशचदुःखिनी ७१
तथैनांचसमानीतांयथास्याःप्राणवल्लभाम्
तथैवपूजयामासमातृस्नेहात्पतिव्रता ७२
एतस्मिन्समयेविप्रलक्ष्मीवासरमुत्तमम्
श्यामाबालाकारयितुंमनश्चक्रेचमातरम् ७३
तस्यामातादरिद्राणिभुक्त्वावैकांतिकेपिच
शावकानांतुचोच्छिष्टंलक्ष्मीकोपसमन्विता ७४
इंदिरायास्तृतीयानिवासराणिगतान्यपि
चतुर्थवासरेतांतत्कारयामाससादृढम् ७५
आगतानगरंसावैराज्ञीसुरतिचंद्रिका
दृष्ट्वागृहंतथादिव्यमिंदिरायाःप्रसादतः ७६
श्यामाबालाचविप्रेंद्रकदाचित्समयेपुनः
मातुर्गृहंगताचाथएश्वर्यस्यदिदृक्षया ७७
श्यामाबालांततोदूराद्दृष्ट्वासंकुपिताचसा
नपश्यामिमुखंतस्याइत्युक्त्वालक्षितास्थिता ७८
गत्वागृहांतरालंचगृहीत्वासैंधवंचसा
आगतास्वगृहंकिंचित्तूष्णींलक्ष्मीसमाश्रितम् ७९
राजास्वामीचपप्रच्छतांसाध्वींपतिदेवताम्
किमानीतंत्वयाकांतेकथयस्वममाग्रतः ८०
कांतोवाच-
राज्यसारंसमानीतंदर्शयिष्यामिभोजने
इत्युक्त्वासातदापाकंकृत्वाचलवणंविना ८१
अन्नादिकंततोदत्वामालाधरायभूभुजे
ततोमालाधरोराजाव्यंजनंलवणवर्जितम् ८२
भुक्त्वावैगुणयतांप्राप्तोराज्यसारंददौचसा
तदाहृष्टमनाराजाभोजनंकृतवान्द्विज ८३
प्रशशंसचतांनारींधन्याधन्याइतिब्रुवन्
एतद्व्रतंचयानारीनकरोतिमहादरात् ८४

जन्मजन्मनिसानारीदरिद्रादुर्भगाभवेत्
इदंयाशृणुयाद्भक्त्यापठेद्योवासमाहितः ८५
सर्वपापैर्विनिर्मुक्तोलक्ष्मीलोकंलभेच्चसः
इमांव्रतकथांयातुनश्रुत्वाक्रियतेव्रतम्
तस्यावृतफलंचैवनश्यत्येवनसंशयः ८६
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेएकादशोऽध्यायः ११

द्वादशोऽध्यायः

शौनकउवाच-
केनपुरायेनभोसूतचान्येनगतपातकः
नरोयातिहरेःस्थानंतद्वदस्वानुकंपया १
सूतउवाच-
ब्राह्मणस्यधनैःप्राणान्प्राणैर्वापिद्विजोत्तम
रक्षांकरोतियोमर्त्योविष्णुलोकंसगच्छति २
पुराराजादीननाथोद्वापरेसंज्ञकेयुगे
आसीदपुत्रोबलवान्वैष्णवःसतुयाजकः ३
एकदागालवंराजापप्रच्छविनयान्वितः
केनपुरायेनजायेतपुत्रोवैकरुणार्णव ४
वदस्वमुनिशार्दूलकरिष्यामितवाज्ञया
येषांनृणांनास्तिसुतोजीवनंहिनिरर्थकम् ५
गालवउवाच-
राजन्शृणुष्वावहितोयत्पृष्टोऽस्मितवाग्रतः
कथयामिसमासेनपुत्रस्योद्भवकारणम् ६
क्रतुंचनरमेधाख्यंकुरुष्वराजसत्तम
तदातेसंततिःस्याद्वैसर्वलक्षणसंयुता ७
राजोवाच-
नरमेधंमहायज्ञंयज्ञानांप्रवरंद्विज
कीदृशंनरमानीयकरिष्यामिगुरोवद ८
गालवउवाच-
सुंदरांगःसुवदनःसमस्तशास्त्रविद्भवेत्

सत्कुलेयदिजातःसतदायज्ञायकल्पते ९
अंगहीनःकृष्णवर्णोमूर्खोयोग्योभवेन्नहि
इत्युक्तेगालवेविप्रसराजामनुजेश्वरः १०
प्रेषयामासदूतांश्चकथयित्वामुनेर्वचः
द्रविणंबहुदत्वाचगालवप्रमुखान्द्विजान् ११
यज्ञार्थेवरयामाससमस्तशास्त्रपारगान्
ततोराजाज्ञयादूताःदेशंदेशंमुदागताः १२
ग्रामेग्रामेद्विजश्रेष्ठपत्तनेऽपिसमाहिताः
कुत्रापिनप्राप्तवंतोगताजनपदंततः १३
नाम्नादशपुरंविप्रप्रकीर्णंगुणिभिर्द्विजैः
यत्रनारीःसुकेशीश्चमृगशावकचक्षुषः १४
दृष्ट्वामुह्यंतिपुरुषाश्चंद्रमुख्यश्चतायतः
तस्मिन्पुरेमनोरम्येकृष्णदेवइतिद्विजः १५
आसीत्पुत्रैस्त्रिभिःसार्द्धंभार्ययाचसुशीलया
वैष्णवःप्रियवादीचविष्णुपूजारतःसदा १६
साग्निकःपितृभक्तश्चवैष्णवानांप्रियंकरः
प्रार्थनांचक्रुरथतेराज्ञोदूताद्विजोत्तमम् १७
पुत्रंदेहीतिदेहीतिवदब्राह्मणसत्तम
नास्तिराज्ञोद्विजश्रेष्ठपुत्रःसंतापनाशनः १८
तदर्थंनरमेधाख्येयज्ञेभवसदीक्षितः
नेष्यामस्तवपुत्रंवैबलिदातुंमहाक्रतौ १९
सुवर्णानांचतुर्लक्षंब्रह्मन्नयसमाहितः
सुखेनयदिदातव्योनोपुत्रःपुत्रलालसात् २०
तदाबलेननेष्यामोराजाज्ञाकारिणोवयम्
दूतानांवचनंश्रुत्वाब्राह्मणौशोकविह्वलौ २१
अभूतांविगतप्राणाविवसंशयमानसौ
किंधनेनसुवर्णेनजीवनेनापिसद्मना
प्रोवाचेदंवचःसोऽपिब्राह्मणोराजपूरुषान् २२
ब्राह्मणउवाच-
यदिदूताःसमानेतुंपुत्रंशोकतमोपहम्

आगतानिश्चितंयूयंशृणुध्वंवचनंमम २३
स्थित्वापृथिव्यांकोभ्रष्टांराजाज्ञांकर्तुमिच्छति
पुत्रंहित्वाकिंतुयूयंवृद्धंमांनयतद्विजम् २४
इतितस्यवचःश्रुत्वादूताःक्रोधसमन्विताः
बलात्कारेणतद्गेहेसुवर्णानिचतत्यजुः २५
यदानेतुंमनश्चक्रुस्तत्पुत्रंकिलतेक्रुधा
बद्धांजलिपुटोभूत्वारुदन्प्रोवोचसद्विजः २६
पुत्राणांज्येष्ठपुत्रंमेहित्वान्यंपुत्रमुत्तमम्
नयतेतिवचोवक्तुंवक्त्रेनायातिहेजनाः २७
द्विजस्यवचनंश्रुत्वाब्राह्मणींरुदतींसतीम्
प्रोचुर्दूताःकनीयांसंपुत्रंदेहीतिसत्तम २८
तेषामितिवचःश्रुत्वाब्राह्मणीभूमितस्तदा
पपातवात्ययासार्द्धंरंभेवभृशदुःखिनी २९
मुद्गरंसासमादायमौलौचाताडयद्बलात्
कनिष्ठंमत्सुतंदूतानापिदास्यामिसर्वथा ३०
एतस्मिन्समयेविप्रविप्रस्यमध्यमःसुतः
प्रोवाचविनयाविष्टःप्रणम्यपितरौरुदन् ३१
मातायदिविषंदद्यात्पित्राविक्रीयतेसुतः
राजाहरतिसर्वस्वंकस्तत्रपालकोभवेत् ३२
इत्युक्त्वातत्सुतोमूर्ध्नाप्रणम्यपितरौसह
दूतैर्जगामत्वरितैराज्ञोऽस्यदीक्षितस्यच ३३
अथतौब्राह्मणौपुत्रविच्छेदक्लिष्टमानसौ
रुदित्वाचरुदित्वाचअंधभावंप्रजग्मतुः ३४
अथतेपथ्यगच्छंतविश्वामित्रमुनेःकिल
आश्रमंशिष्ययुक्तंचसेवितंमृगशावकैः ३५
समुनीराजपुरुषान्दृष्ट्वापप्रच्छसादरम्
केयूयंहोकुत्रगतायथाकावृत्तिरुच्यताम् ३६
राजदूताऊचुः-
शृणुष्वावहितोविप्रराज्ञःपुत्रोनजायते
तदर्थंनरमेधाख्येयज्ञेराजासुदीक्षितः ३७

नयामस्तत्रबल्यर्थमिमंब्राह्मणपुत्रकम्
इतितेषांवचःश्रुत्वासविप्रःसदयोऽभवत् ३८
प्राणाममापिगच्छंतुसुखीभवतुबालकः
बालकार्थेद्विजार्थेचस्वाम्यर्थेयेजनाइह ३९
त्यजन्तितृणवत्प्राणांस्तेषांलोकाःसनातनाः
विमृश्येतिमुनिःस्वांतेसप्रोवाचद्विजर्षभः ४०
यज्ञेबलिसमादातुमिमंब्राह्मणबालकम्
हित्वामांनयथाथाशुह्ययंबालकउत्तमः ४१
संसारेजन्मसंप्राप्यनलब्धंसुखमत्रच
अनेनबालकेनापिमरिष्यतिकथंत्वयम् ४२
आगतेऽस्मिन्गृहाद्दूताःपितरावस्यदुःखितौ
हतभाग्यौगतोनूनंयमस्येवगृहंप्रति ४३
एवंतस्यवचःश्रुत्वादूताःप्रोचुरथद्विजम्
भूपालस्यविनाज्ञांवैदीननाथस्यभूसुर ४४
नेतुंत्वांपलितंप्राज्ञनेष्यामोहिकथंवयम्
एवमुक्त्वाचतेदूताजग्मूराज्ञःपुरींतदा ४५
समुनिर्दूतसंघैश्चगतवान्यज्ञमंदिरम्
राजानंकथयामासुर्दूताविप्रस्यचेष्टितम् ४६
तच्छ्रुत्वाशंकितमनाःप्रोवाचेदंवचःसतम्
मुनेयद्यपिमेयज्ञेकृतेपुत्रोभविष्यति ४७
बलिविनापिभोब्रह्मन्तदाविप्रसुतंनय ४८
मुनिरुवाच-
यज्ञेत्वयाकृतेराजन्महापुत्रोभविष्यति
अत्रतेसंशयोमाभूदमोघमपिदर्शनम् ४९
इतितस्यवचःश्रुत्वाराजात्यंतसहर्षकः
चक्रेपूर्णाहुतिंयज्ञेसमस्तैर्मुनिभिःसह ५०
अथातःसमुनिःश्रेष्ठोब्राह्मणस्यसुतंचतम्
गृह्यदशपुरंनामनगरंगतवांस्तदा ५१
भवनंतस्यगत्वाचउक्तवान्वचनंमुनिः
गृहेत्वंतिष्ठसेविप्रतिष्ठामिमृतवन्मुने ५२

राजाबलेनमेपुत्रंनीतवान्किंकरोम्यहम्
पुत्रेगतेचभोविप्रदंपत्योरावयोःपुनः ५३
गतानिचांधभावंवैक्रंदनैर्लोचनान्यपि
अथासौमुनिशार्दूलःपुत्रंपश्यनयेतिच ५४
उक्तवांस्तौयदाविप्रब्राह्मणौजातहर्षकौ
पुत्रायाकारणंकृत्वागतावेतौबहिःक्षणात् ५५
मुनेर्वचनसिद्धित्वात्तत्क्षणंलोचनंतयोः
आलोकंतुगतंतूर्णंपुत्रस्यदर्शनादपि ५६
पुत्रस्यमुखपद्मंतौलोचनैरलिसंनिभैः
पीत्वामुनिंचिरंतंचनमस्कृत्यपुनःपुनः ५७
प्रोचतुर्वचनंविप्राब्राह्मणौप्रियवादिनौ
अहोमुनेजीवदानमावयोःसुकृतंकिल ५८
तयोरेववचःश्रुत्वासमुनिःकरुणार्णवः
दत्वाशिषंचतौविप्रजगामनिजमाश्रमम् ५९
मुनिःकरगतंचैवकृत्वाविष्णोःपरंपदम्
तपस्तेपेमहाभागोदेवतैरपिदुर्ल्लभम् ६०
किंचित्कालेगतेविप्रतस्यराज्ञोऽभवत्सुतः
सुंदरोराजयोग्यश्चइंदुःक्षीरनिधाविव
पुत्रोत्सवेसोऽपिविप्रराजादत्वाधनानिवै ६१
बुभुजेदेववद्भूम्यांविशोकोजातकौतुकः
विप्रान्पालयतेयस्तुप्राणान्दत्वाधनान्यपि ६२
सयातिविष्णुभवनंपुनरावृत्तिदुर्ल्लभम्
पठंतियेऽत्रभक्त्याचशृण्वंतिविप्रतःकथाम् ६३
आख्यानंश्लोकमेकंवागच्छंतिविष्णुमंदिरम् ६४
इति श्रीपाद्मेमहापुराणेसूतशौनकसंवादेब्रह्मखंडेब्राह्मणपालनं
नामद्वादशोऽध्यायः १२

त्रयोदशोऽध्यायः

शौनकउवाच-
कृष्णजन्माष्टमीसूततस्यामाहात्म्यमुत्तमम्

कथयस्वमहाप्राज्ञचोद्धरस्वमहार्णवात् १
सूतउवाच-
कृष्णजन्माष्टमींब्रह्मन्भक्त्याकरोतियोनरः
अंतेविष्णुपुरंयातिकुलकोटियुतोद्विज २
अष्टमीबुधवारेचसोमेचैवद्विजोत्तम
रोहिणीऋृक्षसंयुक्ताकुलकोटिविमुक्तिदा ३
महापातकसंयुक्तःकरोतिव्रतमुत्तमम्
सर्वपापविनिर्मुक्तश्चांतेयातिहरेर्गृहम् ४
कृष्णजन्माष्टमींब्रह्मन्नकरोतिनराधमः
इहदुःखमवाप्नोतिसप्रेत्यनरकंव्रजेत् ५
नकरोतिचयानारीकृष्णजन्माष्टमीव्रतम्
वर्षेवर्षेतुसामूढानरकंयातिदारुणम् ६
जन्माष्टमीदिनेयोवैनरोऽश्नातिविमूढधीः
महानरकमश्नातिसत्यंसत्यंवदाम्यहम् ७
दिलीपेनपुरापृष्टोवसिष्ठोमुनिसत्तमः
तच्छृणुष्वमहाप्राज्ञसर्वपातकनाशनम् ८
दिलीपउवाच-
भाद्रेमास्यसिताष्टम्यांयस्यांजातोजनार्द्दनः
तदहंश्रोतुमिच्छामिकथयस्वमहामुने ९
कथंवाभगवान्जातःशंखचक्रगदाधरः
देवकीजठरेविष्णुःकिंकर्तुंकेनहेतुना १०
वसिष्ठउवाच-
शृणुराजन्प्रवक्ष्यामिकस्माज्जातोजनार्द्दनः
पृथिव्यांत्रिदिवंत्यक्त्वाभवतेकथयाम्यहम् ११
पुरावसुंधराह्यासीत्कंसादिनृपपीडिता
स्वाधिकारप्रमत्तेनकंसदूतेनताडिता १२
क्रंदतीक्रंदतीसातुययौघूर्णितलोचना
यत्रतिष्ठतिदेवेशउमाकांतोवृषध्वजः १३
कंसेनताडितानाथइतितस्मैनिवेदितुम्
बाष्पवारीणिवर्षंतिविवर्णासाविमानिता १४

क्रंदंतींतांसमालोक्यकोपेनस्फुरिताधरः
उमयासहितःसर्वैर्देववृंदैरनुव्रतः १५
स्राजगाममहादेवोविधातृभवनंरुषा
गत्वाचोवाचब्रह्माणंकंसध्वंसनहेतवे १६
उपायःसृज्यतांब्रह्मन्भवताविष्णुनासह
एश्वरंतद्वचःश्रुत्वागंतुंप्राहकृतात्मभूः १७
क्षीरोदेयत्रवैकुंठःसुप्तोऽस्तिभुजगोपरि
हंसपृष्ठंसमारुह्यहरेरंतिकमाययौ १८
तत्रगत्वाचतंधातादेववृंदैर्हरादिभिः
संयुक्तःस्तूयतेवाग्भिःकोमलंवाग्विदांवरः १९
नमःकमलनेत्रायहरयेपरमात्मने
जगतःपालयित्रेचलक्ष्मीकांतनमोऽस्तुते २०
इतितेभ्यःस्तुतिंश्रुत्वाप्रत्युवाचजनार्द्दनः
देवान्क्लिष्टमुखान्सर्वान्भवद्भिरागतंकथम् २१
ब्रह्मोवाच–
शृणुदेवजगन्नाथयस्मादस्माकमागतम्
कथयामिसुरश्रेष्ठतदहंलोकभावन २२
शूलिदत्तवरोन्मत्तःकंसोराजादुरासदः
वसुधाताडितातेनकरघातेनपीडिता २३
वरंदत्वापुराप्यग्रेमाययातुप्रवंचितः
भागिनेयंविनाशंभोमरणंभवितानमे २४
तस्माद्गच्छस्वयंदेवकंसंहंतुंदुरासदम्
देवकीजठरेजन्मलब्ध्वागत्वाचगोकुलम् २५
ब्रह्मणाप्रेरितोदेवःप्रत्युवाचचशूलिनम्
पार्वतींदेहिदेवेशस्रब्दंस्थित्वागमिष्यति २६
उमयारक्षयासार्द्धंशंखचक्रगदाधरः
उद्दिश्यमथुरांचक्रेप्रयाणंकमलासनः २७
देवकीजठरेजन्मलेभेतत्रगदाधरः
यशोदाकुक्षिमध्यास्तेशर्वाणीमृगलोचना २८
नवमासांश्चविश्रम्यकुक्षौनवदिनांतकान्

भाद्रेमास्यसितेपक्षेचाष्टमीसंज्ञकातिथिः २९
रोहिणीतारकायुक्तारजनीघनघोषिता
तस्यांजातोजगन्नाथःकंसारिर्वसुदेवजः ३०
वैराटीनंदपत्नीचयशोदाऽजीजनत्सुताम्
पुत्रंपद्मकरंपद्मनाभंपद्मदलेक्षणम् ३१
तदाहर्षितुमारेभेदृष्ट्वाह्यानकदुंदुभिः
कंसासुरभयत्रस्ताप्रोवाचदेवकीतदा ३२
वैराटींगच्छभोनाथसुतंप्रत्यर्पितंकिल
पुत्रंदत्वायशोदायैसुतांतस्याःसमानय ३३
तस्यावचःसमाकर्ण्यवसुदेवोऽपिदुःखितः
अंकेकुमारमादायवैराट्यभिमुखंययौ ३४
यमुनाजलसंपूर्णातत्पथेमध्यवर्त्मनि
आसीद्घोरा महादीर्घागम्भीरोदकपूरभाक् ३५
एवंदृष्ट्वातटेस्थित्वायमुनामवलोकयन्
वसुदेवोऽपिदुःखार्तोविललापातिचिंतया ३६
किंकरोमिक्वगच्छामिविधिनापिहिवंचितः
कथमत्रगमिष्यामिवैराटींनंदमंदिरम् ३७
हरिणातत्रसानंदंमाययावंचितःपिता
क्षणमात्रंतटेस्थित्वायमुनामवलोकयन् ३८
तेनदृष्टापुनःसापिक्षणाज्जानुवहाभवत्
तांदृष्ट्वाहृष्टउत्तस्थौप्रस्थानमकरोद्यथा ३९
मायांकृत्वाजगन्नाथःपितुरंकाज्जलेऽपतत्
तंपुत्रंपतितंदृष्ट्वाहाहाकृत्वासुदुःखितः ४०
महोपायंपुनःकर्तुंविधिनातेनवंचितः
त्राहिमांजगतांनाथसुतंरक्षसुरोत्तम ४१
जनकक्रंदितंदृष्ट्वाकंसारिःकृपयामुहुः
जलक्रीडांसमाचर्यपितुःक्रोडमगात्पुनः ४२
यथातेनयदुश्रेष्ठोजगामनंदमंदिरम्
सुतंदत्त्वायशोदायैसुतांतस्याःसमानयत् ४३
निजागारंततःप्राप्यपत्न्यैप्रत्यर्पितासुता

देवकीचप्रसूतेतिवार्ताप्राप्तासुरारिणा ४४
आनेतुंप्रस्थितादूताःसुतंदुहितरंतदा
आगत्यकंसदूतास्तेसुतांनेतुंप्रचक्रमुः ४५
बलादेनांसमाकृष्यदेवकीवसुदेवयोः
कंसदूतैर्गृहीत्वासाअर्पितातुसुरारये ४६
सधृत्वातांमहाराजःसभयोऽभूद्दुरासदः
शुद्धकांचनवर्णाभांपूर्णेंदुसदृशाननाम् ४७
कंसोहसंतींतांदृष्ट्वाविद्युत्स्फुरितलोचनाम्
आदिदेशासुरश्रेष्ठोजहिनीत्वाशिलोपरि ४८
आज्ञांलब्ध्वाऽसुरास्तेवैनिष्पेष्टुंतांप्रवर्तिताः
विद्युच्छीघ्रतयागौरीजगामशंकरांतिकम् ४९
गौर्युवाच-
शृणुराजन्प्रवक्ष्यामियत्रास्तेशत्रुरुत्तमः
नंदस्यनिलयेगुप्तस्तवहंताऽसुरोत्तम ५०
वसिष्ठउवाच-
एवमुक्त्वातुसादेवीजगामनिजमंदिरम्
श्रुत्वावाक्यंततोदेव्याःकंसोराजासुदुःखितः ५१
भगिनींपूतनामाहगच्छत्वंनंदमंदिरम्
छद्मनातंसुतंहत्वागच्छतेवांच्छितंबहु ५२
दास्यामिशत्रुंहंतुंमेव्रजशीघ्रतरंशुभे
आज्ञांप्राप्यराक्षसीसागोकुलाभिमुखंगता ५३
माययासुंदरीरूपाप्रविष्टातत्रगोकुले
पयोधरेगरंसातुधृत्वाहंतुमुपागता ५४
पशुपानांगृहद्वारिप्रविष्टालक्षितेतिच
गत्वांतरुत्थाप्यशिशुंस्तनंदत्वापसद्गतिम् ५५
ततस्तुशकटंक्षिप्त्वातृणावर्तादिमर्दनम्
कालीयदमनंकृत्वागतोमधुपुरींततः ५६
गत्वाकंसोहतःक्रूरःकंसमल्लानजीजयत्
एतत्तेकथितंराजन्विष्णोर्जन्मदिनव्रतम् ५७
श्रुत्वापापानिनश्यंतिकुर्यातिंकवाभविष्यति

यइदंकुरुतेमर्त्योयाचनारीहरेर्व्रतम् ५८
एश्वर्यमतुलंप्राप्यजन्मन्यत्रयथेप्सितम्
पूर्वविद्धानकर्त्तव्यातृतीयाषष्ठिरेवच ५९
अष्टम्येकादशीभूताधर्मकामार्थवांच्छुभिः
वर्जयित्वाप्रयत्नेनसप्तमीसंयुताष्टमी ६०
विनाऋृक्षेऽपिकर्तव्यानवमीसंयुताष्टमी
उदयेचाष्टमीकिंचित्सकलानवमीयदि ६१
मुहूर्तरोहिणीयुक्तासंपूर्णाचाष्टमीभवेत्
अष्टमीबुधवारेणरोहिणीसहितायदि ६२
सोमेनैवभवेद्राजन्किंकृतैर्व्रतकोटिभिः
नवम्यामुदयात्किंचित्सोमेसापिबुधेऽपिच ६३
अपिवर्षशतेनापिलभ्यतेवानलभ्यते
विनाऋृक्षंनकर्तव्यानवमीसंयुताष्टमी ६४
कार्याविद्धापिसप्तम्यांरोहिणीसंयुताष्टमी
कलाकाष्ठामुहूर्तेऽपियदाकृष्णाष्टमीतिथिः ६५
नवम्यांसैववाग्राह्यासप्तमीसंयुतानहि
किंपुनर्बुधवारेणसोमेनापिविशेषतः ६६
किंपुनर्नवमीयुक्ताकुलकोटयास्तुमुक्तिदा
पलवेधेनराजेंद्रसप्तम्याअष्टमींत्यजेत् ६७
सुरायाबिंदुनास्पृष्टंगंगांभःकलशंयथा
दिलीपउवाच-
केनचादौकृतंचेदंकेनवातत्प्रकाशितम्
किंपुण्यंकिंफलंदेवकथयस्वमहामुने ६८
वसिष्ठउवाच-
चित्रसेनोमहाराजामहापापपरोमहान्
अगम्यागमनंकृत्वास्वर्णस्तेयंद्विजस्यच ६९
सुरायांचसदातृप्तोवृथामांसेसदारतः
एवंपापसमायुक्तोनित्यंप्राणिवधेरतः ७०
चांडालैःपतितैःसार्द्धमालापंसर्वदाकरोत्
एतदेवंविधोराजामृगयायांमनोदधे ७१

अरगयेद्वीपिनंज्ञात्वावेष्टयित्वाचसर्वतः
सावधानंभटान्सर्वान्वाक्यमेतदुवाचह ७२
अहमेवनिहन्म्येनंयोऽन्योस्मिन्प्रहरिष्यति
सवध्योनात्रसंदेहोव्याघ्रोराज्ञःपथाययौ ७३
सलज्ञोऽपिततोराजाव्याघ्रंपश्चाज्जगामह
अनेकक्लेशदुःखेनव्याघ्रंहंतुंसमाहितः ७४
क्षुत्पिपासाकुलक्लेशःसंध्यायांयमुनातटे
अष्टमीरोहिणीयुक्तातद्दिनंजन्मवासरम् ७५
श्वःकन्यायमुनायांवैव्रतंचक्रुर्नराधिप
नानोपहारैर्द्रव्यैश्चधूपदीपैःसुशोभनैः ७६
गंधपुष्पंतथाद्रव्यंकुंकुमादिमनोहरम्
अन्नंबहुगुणंदृष्ट्वाभोक्तुंतन्मानसंकुलम् ७७
राजोवाच–
अन्नाभावान्ममाद्याशुप्राणायास्यंतिनिश्चितम्
स्त्रियऊचुः–
जन्माष्टम्यांहरेराजन्नभोक्तव्यंत्वयानघ ७८
गृध्रमांसंखरंकाकंगोमांसमन्नमेवच
भुक्तवान्नात्रसंदेहोयोभुंक्तेकृष्णजन्मनि ७९
किंकिंछिद्रंनसंजातंसंसारेवसतांनृणाम्
येनदेहेस्थितेप्राणेजयंतीनकृतानृप ८०
तत्राकृतोपवासस्यशासनंयममंदिरम्
यद्दत्तंपितरोनित्यंनगृह्णंतियथाविधि ८१
पितरःपातिताःसर्वेजयंत्यांभोजनेकृते
इतिश्रुत्वाततोराजाव्रतंचक्रेनराधिप ८२
किंचित्पुष्पंकियद्गंधंवस्त्रंचानीयहर्षितः
एतद्व्रतंसमायुक्तंतिथिभांतेचपारणम्
व्रतस्यास्यप्रभावेणचित्रसेनोहरेर्गृहम् ८३
दिव्यंविमानमारुह्यगतवान्पितृभिःसह
यत्फलंमथुरांगत्वादृष्ट्वाकृष्णमुखांबुजम् ८४
तत्फलंप्राप्यतेपुंसाकृष्णजन्माष्टमीव्रतात्

यत्फलंद्वारकांगत्वादृष्टेविश्वेश्वरेहरौ
तत्फलंप्राप्यतेदीनैःकृत्वाजन्माष्टमीव्रतम् ८५
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेहरिजन्माष्टमीव्रतमाहात्म्यं
नामत्रयोदशोऽध्यायः १३

चतुर्दशोऽध्यायः

शौनकउवाच
कथयस्वमहाप्राज्ञब्राह्मणस्यकृपार्णव
माहात्म्यंसर्ववर्णानांश्रेष्ठस्यकृपयाचमे १
सूतउवाच
ब्राह्मणःसर्ववर्णानांगुरुरेवद्विजोत्तम
सर्वामराश्रयोज्ञेयःसाक्षान्नारायणःप्रभुः २
कुर्यात्प्रणामंयोविप्रंहरिबुद्ध्यातुभूसुरम्
भक्त्यातस्यद्विजश्रेष्ठवर्द्धतेसंपदादिकम् ३
ननमेद्ब्राह्मणंदृष्ट्वाहेलयापिचगर्वितः
छेदनंतुतस्यशिरःकर्तुमिच्छेत्सदाहरिः ४
कृतापराधंविप्रंयेद्विषंतिपापबुद्धयः
हरिंद्विषंतितेज्ञेयानिरयंयांतिदारुणम् ५
यःकर्तुंप्रार्थनांविप्रंपश्येत्क्रोधेनचागतम्
कृतांतश्चक्षुषोस्तस्यतप्तसूचींपदातिवै ६
कुरुतेभूसुरंमूढोभर्त्सनंयोनराधमः
यमदूतामुखेतस्यतप्तलोहंददतिच ७
येषांनिकेतनेभुंक्तेद्मासुरोवैतपोधनः
सुपर्वाणैःस्वयंकृष्णोभुंक्तेतेषांनिकेतने ८
नश्यंतिसर्वपापानिद्विजहत्यादिकानिच
कणमात्रंभजेद्यस्तुविप्रांघ्रिसलिलंनरः ९
योनरश्चरणौधौतंकुर्याद्धस्तेनभक्तितः
द्विजातेर्वच्मिसत्यंतेसमुक्तःसर्वपातकैः १०
पुत्रहीनाचयानारीमृतवत्साचयांगना
सपुत्राजीववत्सासाद्विजपद्मांघ्रिसेवनात् ११

ब्रह्मांडेयानितीर्थानितानितीर्थानिसागरे
उदधौयानितीर्थानितिष्ठंतिद्विजपादयोः
द्विजांघ्रिसलिलैर्नित्यंसेचितंयस्यमस्तकम् १२
सस्नातःसर्वतीर्थेषुसमुक्तःसर्वपातकैः
शृणुशौनकवक्ष्यामिमाहात्म्यंपापनाशनम् १३
विप्रपादोदकस्याहमितिहासंतपोधन
आसीत्पुराद्विजश्रेष्ठवैश्यवृत्तिपरायणः १४
शूद्रोभीमोद्वापरेचब्रह्महत्यासहस्रकृत्
निष्ठुरःसर्वदातुष्टःसमहान्वैश्ययापुनः १५
शूद्राचारपरिभ्रष्टोभीमोऽसौगुरुतल्पगः
प्रत्येकंवच्मिकिंतस्यदस्योःसंख्यानविद्यते १६
पापानांमुनिशार्दूलभीमस्यदुष्टचेतसः
एकदासगतःकश्चिद्ब्राह्मणस्यनिवेशनम् १७
गत्वातंतस्यगेहात्तुद्रव्यंनेतुंमनोदधे
तत्रोवासब्राह्मणस्यबहिर्द्वारसमीपतः १८
दैन्ययुक्तंवचःप्राहक्ष्मासुरंसतपोधनम्
भोस्वामिन्शृणुमेवाक्यंदयालुरिवमन्यते १९
क्षुधार्तोऽहदेहिचान्नंप्राणायास्यंतिमेद्रुतम् २०
ब्राह्मणउवाच
क्षुधार्त्तशृणुमेकश्चिद्वाक्यंकर्तुंनविद्यते
पाकंमेतंडुलानित्वंनीत्वाभुंक्ष्वयथासुखम् २१
नास्तिमेजनकोमातानास्तिसूनुःसहोदरः
नास्तिजायामातृबंधुर्मृताःसर्वेविहायमाम् २२
तिष्ठाम्येकोगृहेऽकर्माभाग्यहीनोतिथेहरिः
एकोमेवसतौचास्तिनजानेतद्विनाकिल २३
भीमउवाच
ममकश्चिद्द्विजश्रेष्ठनास्तिसेवांतवापिच
शूद्रोऽहनिलयेजात्याकृत्वास्थास्यामितेसदा २४
सूतउवाच
इतितस्यवचःश्रुत्वासानंदःक्ष्मासुरस्तदा

पाकंविधायतूर्णंसददावन्नंतपोधन २५
सोऽपिहर्षसमायुक्तस्तस्थौतत्रद्विजालये
सेवांकुर्वन्स्नेहयुक्तांभूसुरस्यमनोहराम् २६
अद्यश्वोवाहनिष्यामिद्रव्यमस्यममापिच
नेतुंयदाकरिष्यामिनेष्यामिनात्रसंशयः २७
परामृश्यचहृद्यंतःकृत्वातस्यक्रियांवदेत्
पादधौतादिकंचासौशिरसागतपातकः २८
आचम्यांघ्रिजलंदध्रेच्छद्मनाप्रतिदिनंद्विजः
एकदाहारकःकश्चिद्द्रव्यंनेतुंसमागतः २९
उत्पाटचरात्रावररंगतोऽसौतद्गृहांतरम्
दृष्ट्वाभीमंप्रहारार्थंदंडहस्तःसमागतः ३०
हारकोमस्तकंतस्यछित्त्वातूर्णंपलायितः
अथतस्यभटाविष्णोःशंखचक्रगदाधराः ३१
समायातास्तथानेतुंभीमंतंवीतकिल्बिषम्
स्यंदनंचागतंदिव्यंराजहंसयुतंद्विज ३२
तत्रारूढोययौविष्णोर्भवनंदुर्लभंकिल
माहात्म्यंभूमिदेवस्यमयातेतत्प्रकीर्तितम्
शृणुयाद्योनरोभक्त्यातस्यपातकनाशनम् ३३

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेब्राह्मणमाहात्म्यं नामचतुर्दशोऽध्यायः १४

पंचदशोऽध्यायः

शौनकउवाच
कथयस्वमहाभागमाहात्म्यंपापनाशनम्
एकादश्याःफलंकिंवाकिल्बिषंस्यादकुर्वतः १
सूतउवाच
एकादश्यास्तुमाहात्म्यंकिमहंवच्मिसांप्रतम्
श्रुत्वाचैकादशीनामयमदूताश्चशंकिताः २
भवंतिनात्रसंदेहोसर्वप्राणिभयंकराः
व्रतानांचैवसर्वेषांश्रेष्ठांचैकादशींशुभाम् ३

उपोष्यजागृयाद्विष्णोःकुर्य्याञ्चमंडनंमहत्
तुलसीदलैस्तुयोमर्त्योहरिपूजांकरोतिवै ४
दलेनैकेनलभतेकोटियज्ञफलंद्विज
अगम्यागमनेचैवयत्पापंसमुदाहृतम् ५
तत्पापंयातिविलयंचैकादश्यामुपोषणात्
घृतपूर्णंप्रदीपंयोदद्याद्विष्णुदिनेद्विज ६
अंतेविष्णुपुरंयातितमोहत्वास्वतेजसा
धन्याजनपदास्तेवैधन्यःसचमहीपतिः ७
हरेर्दिनेयस्यराज्येचैकादश्यामहोत्सवः
नारायणस्यशयनेपार्श्वस्यपरिवर्त्तने ८
विशेषेणप्रबोधिन्यानिराहाराभवंतिये
मदंतिकंनानयध्वंप्राणिनःपुरायभागिनः ९
अहर्निशंपितृपतिःसमादिशतिदूतकान्
एकादशीजगन्नाथवल्लभापुरायवर्धिनी १०
विष्णुर्देहंदहत्येवतस्यामन्नस्यभक्षणे
तेषांधिग्जीवनंसंपत्धिक्सौंदर्यंचवर्तनम् ११
येऽन्नमश्नंतिपापिष्ठाश्चैकादश्यांहिविड्भुजः
एकादश्यांद्विजश्रेष्ठभुक्तिमाश्रित्यकेवलम् १२
बहूनिविविधान्येवतिष्ठंतिदुरितानिच
अमावास्यांयथास्त्रीणांसंगमेकलुषंमहत् १३
एकादश्यांतथैवान्नभक्षणेवृजिनंभवेत्
रोगिणश्चतथाखंजकाससोदरकुष्ठकाः १४
भवंतिप्राणिनस्तेवैतस्यामन्नस्यभक्षणे
ग्रामशूकरतांयांतिदारिद्र्यंचप्रयांतिवै १५
राजबद्धाद्विजश्रेष्ठतस्यामन्नस्यभक्षणे
संसारेयानिपापानितानिविप्रहरेर्दिने १६
भुक्तिमाश्रित्यतिष्ठंतिजलभक्षणमाज्ञया
कुर्वतांसर्वपापानिनरकान्निष्कृतिर्भवेत् १७
ननिष्कृतिर्भवेन्नृणांभुंजतांचहरेर्दिने
नरायावंतिचान्नानिभुंजतेचहरेर्दिने १८

प्रत्यन्नंचब्रह्महत्याकोटिजंवृजिनंभवेत्
पुनर्वच्मिपुनर्वच्मिश्रूयतांश्रूयतांनराः १९
नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंहरेर्दिने
गंगादिषुचतीर्थेषुस्नात्वायत्फलमाप्यते २०
चंद्रसूर्योपरागेचचैकादश्यामुपोषितः
अर्चित्वोत्पलमालाभिस्तस्यांचकमलापतिम् २१
विधिवत्पारणंकृत्वानमातुर्गर्भभाजनम्
एकादश्यांहरेर्गेहेकरोतिमंडनंद्विज २२
परमांगतिमासाद्यतिष्ठेद्विष्णुनिकेतने
एकादशींसमासाद्यनिराहाराभवंतिये २३
तेषांविष्णुपुरेशश्वन्निवासोऽपिनसंशयः
तुलसीभक्तिसंलीनंमनोयेषांविराजते २४
तेयांतिपरमंविष्णोःस्थानमेवनसंशयः
परद्रव्येष्वभिरुचिर्येषांचैवनविद्यते २५
संतुष्टमनसोयेऽपितेषांविष्णुपुरंध्रुवम्
दुर्भिक्षकालमासाद्यप्राणिभ्योयेनरोत्तमाः २६
ददत्यन्नंहरेःसद्मतेषांचैवनसंशयः
गवांद्विजानांत्राणायस्वामिनोयोषितस्तथा २७
प्राणान्मुंचंतियेमर्त्यास्तेषांविष्णुपुरंध्रुवम्
प्राणिभिर्दशमीविद्धानचोपोष्याकदाचन २८
परिहार्यंद्विजश्रेष्ठदुर्जनस्यांतिकंयथा
अरुणोदयवेलायांदशमीसंगतायदि २९
तत्रोपोष्याद्वादशीस्यात्त्रयोदश्यांतुपारणम्
दशमीशेषसंयुक्तोयदिस्यादरुणोदयः ३०
वैष्णवेननकर्त्तव्यंतद्दिनैकादशीव्रतम्
चतस्रोघटिकाःप्रातररुणोदयउच्यते ३१
यतीनांस्नानकालोयंगंगांभःसदृशःस्मृतः
अरुणोदयकालेतुदशमीयदिदृश्यते ३२
नतत्रैकादशीकार्याधर्मकामार्थनाशिनी
स्वल्पांचदशमीविद्धांत्यजेदेकादशींबुधः ३३

सुराबिंदोस्तुसंपर्कात्घृतकुंभंत्यजेद्यथा
संपूर्णैकादशीयत्रद्वादश्यांपुनरेवसा ३४
उत्तरायतिभिःकार्यापूर्वामुपवसेद्गृही
एकादशीकलायत्रद्वादशीपरतोनचेत् ३५
तत्रक्रतुशतंपुरयंत्रयोदश्यांतुपारणम्
एकादशीविलुप्ताचेत्परतोद्वादशीयुता ३६
उपोष्याद्वादशीपूर्णायदीच्छेत्परमांगतिम्
संपूर्णैऽकादशीयत्रप्रभातेपुनरेवसा ३७
सर्वैरेवोत्तराकार्यापरतोद्वादशीयदि
एकादशीव्रतेयेषांमनःसंलीयतेनृणाम् ३८
तेषांस्वर्गोहिवासोऽथयांतितेसदनंहरेः
एकादश्याःपरंनास्तिपरलोकस्यसाधनम् ३९
बहुपापसमायुक्तःकरोतिहरिवासरम्
सर्वपापविनिर्मुक्तःसयातिहरिमंदिरम् ४०
पतिसहितायायोषित्करोतिहरिवासरम्
सुपुत्रास्वामिसुभगायातिप्रेत्यहरेर्गृहम् ४१
योयच्छतिहरेरग्रेप्रदीपंभक्तिभावतः
हरेर्दिनेद्विजश्रेष्ठपुरयसंख्यानविद्यते ४२
यांगनाभर्तृसहिताकुरुतेजागरंहरेः
हरेर्निकेतनेतिष्ठेच्चिरंपत्यासहद्विज ४३
यत्किञ्चिद्धरयेवस्तुभक्त्यायच्छतियोद्विज
हरेर्दिनेतस्यपुरयमक्षयंचैवसर्वदा ४४
पुरासीद्वल्लभोनाम्नानगरेकांचनाह्वये
धनेनपुष्कलेनापिराजतेसधनेश्वरः ४५
तस्यप्रियामहारूपानाम्नाहेमप्रभाद्विज
गरीयान्मुखरस्तत्रबाधतेचकलेर्गुणः ४६
सासदाकलहंकुर्यात्पत्यासहतपोधन
शश्वद्गुरुजनान्कामंभर्त्सनान्नीचभाषया ४७
पाकपात्रेसदाश्नीयात्गुप्तासैकांतिकेमला
उच्छिष्टंगुरुजनेभ्यश्चदद्याद्वैप्रतिवासरम् ४८

जारेसदास्थितंचित्तमहंसाध्वीतिसावदेत्
स्वामिनःकलहैर्ब्रह्मन्मनोद्वेगकरासदा ४९
एकदाचागतांदृष्ट्वाचकारभर्त्सनांचताम्
भर्त्तातस्याःप्रहारंचसर्वपापयुतांद्विज ५०
सैवरोषसमायुक्तागताशून्यगृहेतुवै
सुप्ताऽज्ञातास्थिताकस्मिन्जलान्नंनचखादह ५१
दैवात्तत्रदिनेविष्णोःपार्श्वस्यपरिवर्त्तनम्
एकादशीव्रतंविप्रसर्वपापप्रणाशनम् ५२
ततःप्रभातेरजनीद्वादशीश्रवणान्विता
आगतातत्रसानारीरोषनिर्भरमानसा ५३
निराहारौकृतौद्वौचनिर्मलासाबभूवह
रात्रौचपंचतांयाताजयंतीवासरेद्विज ५४
यमाज्ञयाततोदूताआगतास्तांतथाविधाम्
नेतुंभयंकरास्तेचपाशमुद्गरपाणयः ५५
बद्ध्वानेतुंमनश्चक्रेकृतांतसदनंयदा
तदागताविष्णुदूताःशंखचक्रगदाधराः ५६
छित्त्वापाशंततोदिव्येस्यंदनेतांगतैनसम्
तेवैचारोहयामासुनिर्मलांभवनंहरेः ५७
गतातैर्वेष्टितासाथदुर्ल्लभंनिर्जरैःशुभम्
विष्णोर्दिवसमाहात्म्यंकथितंतेद्विजर्षभ ५८
अनिच्छयापियःकुर्यात्सयातिहरिमंदिरम्
एकादश्यादिनेमर्त्योदीपंदातुंहरेर्गृहे ५९
गच्छेत्प्रतिपदंसोऽपिचाश्वमेधफलाधिकम्
शृणवंतिचपुराणानिपठंतिचहरेर्दिने
प्रत्यक्षरंलभंतेतेकपिलादानजंफलम् ६०

इति श्रीपाद्मेमहापुराणेसूतशौनकसंवादेब्रह्मखंडेहरिवासरमाहात्म्यकथनं नामपंचदशोऽध्यायः १५

षोडशोऽध्यायः

शौनकउवाच

कर्मणाकेनभोःसूतचैनसांसंक्षयोभवेत्
श्रीहरेश्चकृपाभूयात्तद्वदस्वानुकंपया १
सूतउवाच
शृणुशौनकवक्ष्यामिशृण्वतांपापनाशनम्
येनविष्णोःकृपास्याद्वैवृजिनक्षयकारिणी २
पौर्णमास्यांतुयोविप्रभक्तिभावसमन्वितः
कुर्य्यान्नानाविधानेनसपर्य्यांश्रीजगद्विभोः ३
कलुषंतस्यनश्येतकोटिजन्मार्जितंमुने
तस्मिन्श्रीरमणस्यास्यकृपाजाताभवेद्ध्रुवम् ४
द्वादश्यामन्नदानंयोभक्त्याकुर्याद्द्विजातये
तस्यनश्यंतिपापानितमांसीवारुणोदये ५
योनरःश्रीहरिंकुर्यात्स्नपनंपयसाद्विज
तत्प्रीतिःश्रीहरेःसद्योद्वादश्यांशर्करादिभिः ६
मंत्रंविनातुयोविप्रदद्याच्छ्रीहरयेकिल
पाषाणसदृशंपुष्पंदातायातिश्रधोगतिम् ७
क्ष्मासुरायचमूर्खायपाषाणसदृशंतुयत्
दद्याद्दानंनरोयोवैतस्यपुण्यंनविद्यते ८
विद्याहीनोद्विजोमोहाद्दानंगृह्णातिमूढधीः
कालानलंयथाजीर्णंतेनसनिरयंव्रजेत् ९
यथादारुमयोहस्तीमृगश्चित्रमयोयथा
विद्याहीनोद्विजोविप्रत्रयस्तेनामधारकाः १०
यथाध्वनिस्थितंवारिपवनार्केणशुद्ध्यति
भक्त्यातुपार्षदंदृष्ट्वातस्यनश्यतिकल्मषम् ११
योनरश्चाश्विनेमासिसघृतान्पूर्णिमादिने
दद्याच्छ्रीहरयेलाजान्क्रीडार्थंतुवराटिकाम् १२
भक्त्यायातिहरेःस्थानंपुनरावृत्तिवर्जितः
नदद्याद्योनरोमोहात्तस्मिन्नतुष्टिदोहरिः १३
वराटिकांयावतींयोहरयेपौर्णिमादिने
तावद्दिनंहरेःस्थानंचाश्विनेसंवसेद्ध्रुवम् १४
करवीरपुरेह्यासीत्पुराशूद्रोऽपिनिर्द्दयः

कालद्विजोद्विजश्रेष्ठनाम्नापापीभयंकरः १५
स्वकार्यनिरतःसोऽपिस्वामिकार्यप्रणाशकः
एकदापंचतांयातोयमदूताभयंकराः १६
आगतास्तंसमानेतुंयमस्यतुनिकेतनम्
बद्ध्वानिन्युश्चतंदृष्ट्वापृष्टवान्सचिवंयमः १७
यमउवाच
अस्यकिंविद्यतेऽमात्यकर्मापिचशुभाशुभम्
कथयस्वसमूलंतुचित्रगुप्तविचक्षण १८
चित्रगुप्तउवाच
असौपापीदुराचारःस्वामिकार्यप्रणाशकः
नास्तिपुण्यंचाणुमात्रंनरकेपरिपच्यताम् १९
शतमन्वन्तरंराजन्नागयोनौचनिष्ठुरः
पाषाणेजन्मचासाद्यगृहेस्थातुंनिरंतरम् २०
सूतउवाच
तावत्कालंततोविप्रनिरयेसपपातह
ततोऽप्यश्मगृहेनागयोनौजातःसुदुःखितः २१
एकदाचाश्विनेमासिपौर्णमासीदिनेद्विज
लाजान्वराटिकानागोबिलात्प्राक्षेपयद्बहिः २२
पतितासाहरेरग्रेपापमस्यस्वयंहरिः
तूर्णंतुनाशयामासदयालुर्दुःखनाशकः २३
कदाचित्प्राप्तकालस्तुपंचत्वंसजगामह
यमदूतास्तमानेतुंचागताबहुशोद्विज २४
बद्ध्वानेतुंयदाचक्रुर्यमस्यसदनंप्रति
तदागताविष्णुदूताःशंखचक्रगदाधराः २५
पाशंछित्त्वारथेदिव्येतमाशुगतकिल्बिषम्
तत्रचारोपयामासुःयमदूताःपलायिताः २६
ततोनिकेतनंविष्णोर्नागस्तैर्वेष्टितोययौ
तत्रतस्थौहरेरग्रेपुनरावर्त्तिवर्जितः २७
भक्त्यायोहरयेदद्याल्लाजांश्चसघृतान्द्विज
वराटिकांतस्यपुण्यंनजानेकिंभवेद्ध्रुवम् २८

यइमंशृणुयाद्विप्रचाध्यायंपापनाशनम्
तस्यनश्यंतिपापानिश्रीहरेःकृपयापिच २९
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेषोडशोऽध्यायः १६

सप्तदशोऽध्यायः

शौनकउवाच
विष्णुपादोदकस्यापिमाहात्म्यंपापनाशनम्
कथयस्वमहाप्राज्ञसमूलंमेकृपार्णव १
सूतउवाच
समस्तपातकध्वंसिविष्णुपादोदकंशुभम्
कणमात्रंवहेद्यस्तुसर्वतीर्थफलंलभेत् २
विष्णुपादोदकंब्रह्मन्स्पर्शतःपापनाशनम्
अकालमरणंनास्तिगंगास्नानफलंलभेत् ३
विष्णुपादोदकंपापीयःपिबेत्तस्यकिल्बिषम्
शरीरस्थंक्षयंयातिकृतंब्रह्मन्नसंशयः ४
तुलसीपर्णसंयुक्तंविष्णुपादोदकंद्विज
योवहेच्छिरसाभक्त्याचांतेयातिहरेर्गृहम् ५
मेरुतुल्यसुवर्णानिदत्त्वायत्फलमाप्यते
हरिपादोदकंस्पृष्ट्वाप्राप्यतेतत्फलंनरैः ६
धेनुकोटिसहस्राणियत्फलंलभतेनरैः
दत्वापादोदकंस्पृष्ट्वातत्फलंप्राप्यतेध्रुवम् ७
यज्ञकोटिसहस्राणिकृत्वायत्फलमाप्यते
हरिपादोदकंस्पृष्ट्वातस्मात्कोटिगुणंनरैः ८
कोटिकन्याप्रदानेनयत्फलंलभ्यतेजनैः
विष्णुपादोदकंस्पृष्ट्वाफलंतस्माद्द्विजाधिकम् ९
दंतिकोटिप्रदानेनसप्तिकोटिप्रदानतः
यत्फलंलभतेमर्त्यःस्पृष्ट्वापादोदकंहरेः १०
दत्वामर्त्यःसप्तद्वीपांससस्यांयत्फलंलभेत्
विष्णुपादोदकंस्पृष्ट्वातस्माद्विप्राधिकंलभेत् ११
शृणुविप्रप्रवक्ष्यामिसंक्षेपेणाधिकंकिमु

विष्णुपादोदकंस्पृष्ट्वापापीयातिहरेर्गृहम् १२
शौनकउवाच
स्पृष्ट्वापीत्वापुराकेनप्राणिनाप्रापिवैगृहम्
कथयस्वहरेः सूतममत्वंचानुकंपया १३
सूतउवाच
पुरात्रेतायुगेपापीनाम्नाविप्रः सुदर्शनः
जनार्द्दनदिनेनित्यमश्नीयात्सद्विजोत्तम १४
शास्त्रनिंदाकरोनित्यंव्रतनिंदाकरः सदा
असावन्यंनजानातिकेवलंस्वोदरंविना १५
एकदाप्राप्तकालस्तुनिधनंप्राप्तवान्द्विज
यमदूताः समायाताबद्ध्वानीतोयमालयम् १६
तंदृष्ट्वायमुनाभ्रातापप्रच्छसचिवंरुषा
भोऽमात्यचास्ययत्पुण्यंपापंवदसमूलतः १७
असौविप्रोमहापापीक्रूरकर्म्मेवदृश्यते १८
चित्रगुप्तउवाच
आकर्णयचास्यपापंपुण्यंनास्त्यणुमात्रकम्
वासरेऽपिहरेर्नित्यमकरोद्भोजनंविभो १९
वासरेकमलाभर्तुश्चाश्नीयाद्योनराधमः
पुरीषंसोऽश्नीयाद्राजन्निरयंयातिदारुणम् २०
मन्वंतरशतंदेहिस्थानंतुनिरयेऽप्यमुम्
ग्रामक्रोडस्ययोनौहिततोजन्मभविष्यति २१
सूतउवाच
यमाज्ञयाततोविप्रतस्यदूतैर्भयंकरैः
पातितस्तुपुरीषेवैमन्वंतरशताधिकम् २२
ततोमुक्तोऽभवच्चासौपृथिव्यांग्रामसूकरः
चिरंनरकमश्नीयाद्धरिवासरभोजनात् २३
ततोविप्रप्राप्तकालः पंचत्वंसजगामह
काकयोनौपुनर्जन्मलेभेऽसौविड्भुजः सदा २४
एकस्मिन्दिवसेविप्रश्रीहरेश्चरणोदकम्
द्वारदेशेस्थितंपीत्वासर्वपापविवर्जितः २५

तस्मिन्नेवदिनेकाकःपतितःशबरस्यच
कालेमृत्युदशांप्राप्तोव्याधेनवायसोपिच २६
आगतेस्यंदनेदिव्येराजहंसयुतेशुभे
आरुह्यबलिभुग्विप्रययौसहरिमंदिरम् २७
पादोदकस्यमाहात्म्यंकथितंपापनाशनम्
यःशृणोतिनरःपापीतस्यपापंविनश्यति २८
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेचरणोदक-
माहात्म्येसप्तदशोऽध्यायः १७

अष्टादशोऽध्यायः

शौनकउवाच
अगम्यागमनंसूतकुर्याद्योवैविमोहितः
तस्यशुद्धिर्भवेत्केनकथयस्वसमूलतः १
सूतउवाच
अभिगच्छतिचांडालद्यंश्वपाकींयोद्विजोत्तमः
उपवासत्रयंकुर्यात्प्राजापत्यंचरेत्ततः २
सशिखंवपनंचैवदद्याद्गोद्वयमेवच
यथार्थदक्षिणांदत्वाशुद्धिमाप्नोतिसद्विजः ३
क्षत्रियोवापिचांडालद्यंवैश्योवायदिगच्छति
प्राजापत्यंसकृच्छ्रंचदद्याद्गोमिथुनद्वयम् ४
अनुगच्छतिशूद्रोहिश्वपाकींचतपोधन
चतुर्गोमिथुनंदद्यात्प्राजापत्यंव्रतंचरेत् ५
मातरंयदिवागच्छेद्भगिनींस्वसुतामपि
वधूंचमोहितोगच्छंस्त्रीणिकृच्छ्राणयथाचरेत् ६
चांद्रायणत्रयंकृत्वादद्याद्गोमिथुनत्रयम्
सशिखंवपनंकृत्वापंचगव्यंपिबेत्ततः ७
हुतेह्यग्नौतथाप्यत्रशुद्ध्यत्येवंतपोधन
पितृदारान्द्विजश्रेष्ठमातुश्चभगिनींतथा ८
गुरुपत्नींमातुलानींभ्रातुर्भार्यांस्वगोत्रजाम्
यदिगच्छतिमोहेनप्राजापत्यद्वयंचरेत् ९

चांद्रायणत्रयंब्रह्मन्पंचगोमिथुनानिच
विप्रेभ्योदक्षिणांदद्याच्छुध्यतेनात्रसंशयः १०
गांचगच्छतियोमूढउपवासत्रयंचरेत्
धेनुंदत्त्वातथाचान्नंशुद्ध्यत्यत्रनसंशयः ११
वेश्यांखरींशूकरींचकपिंतुंमहिषींद्विज
आकंठतःसमाक्षिप्यगोमयोदककर्द्दमे १२
तत्रतिष्ठेन्निराहारोत्रिरात्रेणैवशुद्ध्यति
सशिखंवपनंकृत्वात्रिरात्रमुपवासयेत् १३
एकरात्रंजलेस्थित्वाशुद्ध्यत्येवनसंशयः
ब्राह्मणींतुयदागच्छेत्योनरःकाममोहितः १४
प्राजापत्यत्रयंकुर्य्याच्चांद्रायणत्रयंतथा
गोत्रयंतुतथादद्याच्छुद्ध्यत्येवतपोधन १५
ब्राह्मणीपंचगव्यंतुपंचरात्रंपिबेद्द्विज
गोद्वयंदक्षिणांदद्याच्छुध्यत्यत्रनसंशयः १६
परांगनांयदागच्छेत्कृच्छ्रंसांतपनंचरेत्
यथार्गलातथायोषित्तस्मात्तांपरिवर्जयेत् १७
वर्णबाह्यांतथानीचामनुगच्छेत्सकृन्नरः
प्राजापत्यंचरेत्कृच्छ्रंशुद्ध्यत्येवनसंशयः १८
अंगारसदृशीयोषित्सर्पिःकुंभसमःपुमान्
तस्याःपरिसरेब्रह्मन्नस्थातव्यंकदाचन १९
जारेणजनयेद्गर्भंयाचनारीकुलांतका
त्याज्यासासर्वथाब्रंह्मस्तत्रदोषोनविद्यते २०
याचनारीगृहाद्गच्छेत्त्यक्त्वाबंधून्स्वकानपि
नष्टासाचकुलभ्रष्टानतस्याःसंगमःपुनः २१
याचनारीयदागच्छेन्मोहितापरपूरुषम्
प्राजापत्यंचरेत्कृच्छ्रंपंचगव्यंपिबेत्ततः २२
गोद्वयंतुततोदद्याच्छुध्यत्येवनसंशयः
ब्राह्मणीबालिशाब्रह्मन्मोहितापरपूरुषम् २३
यदागच्छेत्तदात्याज्याजनैर्दोषोनविद्यते
योगच्छेद्ब्राह्मणींविप्रभूसुरःकाममोहितः

गोतिलांश्चतदादद्याच्छुद्ध्यत्यत्रनसंशयः २४
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेअ्रष्टादशोऽध्यायः १८

एकोनविंशोऽध्यायः

शौनकउवाच
अज्ञानात्प्राश्यविरामूत्रंसुरांसंस्पृश्यवापुनः
यथाशुद्धिर्भवेत्तेषांकथयामिशृणुद्विज १
प्राजापत्यद्वयंकुर्य्यात्तीर्थाभिगमनंमुने
वृषैकादशगोदानंसशिखंवपनंततः २
गत्वाचतुष्पथंसर्वंप्राजापत्यव्रतंतथा
गोद्वयंतुततोदद्यात्पंचगव्यंपिबेत्ततः ३
ब्राह्मणान्भोजयित्वातुशुद्ध्यत्यत्रनसंशयः
चांडालान्नंजलंचैवज्ञानतोऽपिविपत्तिषु ४
यदिभुङ्क्तेनरःकश्चित्कृच्छ्रंचांद्रायणंचरेत्
सशिखंवपनंकृत्वापंचगव्यंततःपिबेत् ५
एकद्वित्रिचतुर्गावोदेयाद्विप्रेष्वनुक्रमात्
वृषलान्नंसूतकान्नंअभोज्यान्नंजलंचवै ६
शूद्रोच्छिष्टंयदाभुंक्तेज्ञानतोवाविपत्तिषु
प्राजापत्यद्वयंकुर्याच्चांद्रायणत्रयंतथा ७
गोद्वयंतुततोदद्यात्पंचगव्यंपिबेद्द्विज
हुत्वाह्यग्नौबहून्विप्रान्भोज्यशुद्धोभवेद्ध्रुवम् ८
आखुनकुलमार्जारैरन्नंचेद्भक्षितंद्विज
तिलदर्भोदकैःप्रोक्ष्यशुद्ध्यत्येवनसंशयः ९
पलांडुंलशुनंशिग्रुमलाबुंगृंजनंपलम्
भुंक्तेयोवैनरोब्रह्मन्व्रतंचांद्रायणंचरेत् १०
मद्यमांसप्रियंशूद्रंनीचकर्म्मानुवर्त्तनैः
तंशूद्रंवर्जयेद्विप्रश्वपाकमिवदूरतः ११
द्विजसेवानुरक्तायेमद्यमांसविवर्जिताः
दानस्वकर्म्मनिरतास्तेज्ञेयावृषलोत्तमाः १२
अज्ञानाद्भुंजतेविप्रसूतकेमृतकेयदि

गायत्रीदशभिर्विप्रःसहस्त्रैश्चशुचिर्भवेत् १३
सहस्त्रैःक्षत्रियश्चैववैश्यःपंचसहस्त्रकैः
पंचगव्यैर्भवेच्छुद्धोवृषलोऽपितपोधन १४
आज्यंतुतोयंनीचस्यभांडस्थंदधियःपिबेत्
अज्ञानतोऽपियोवर्णःप्राजापत्यव्रतंचरेत् १५
दानंबहुतरंदद्याच्छुद्धोह्यग्नौयथाविधि
शूद्राणांनोपवासोऽपिदानेनैवविशुद्ध्यति १६
सशिखंवपनंकुर्यादहोरात्रोपवासतः
नीचैर्दंडादिभिश्चैवताडितोयोनरोद्विज १७
प्राज्ञापत्यव्रतंकुर्य्याच्चांद्रायणव्रतंतुवा
सशिखंवपनंचैवपंचगव्यंपिबेत्ततः १८
गोद्वयंतुततोदद्यादग्नौचान्नादिकंहुतम्
मद्यपानंगृहेविप्रज्ञानतोऽपियदृच्छया १९
यदिभुंक्तेनरःकश्चित्पात्यःसोऽपिकुलान्नरः
गोबीजहंतायोविप्रच्छेदकश्चदलस्यच २०
स्वर्णस्तेयीभवेत्कृच्छ्रंप्राजापत्यत्रयंचरेत्
सशिखंवपनंकृत्वापंचगव्यंतथापिबेत् २१
यथाविधिहुतंचाग्नौदद्याद्धेनुत्रयंतथा
तस्यभुक्तंजलंचैवग्राह्यंस्याद्वैतपोधन २२
प्रातस्त्र्यहंतुचाश्नीयात्त्र्यहंसायमयाचितम्
त्र्यहंचैवतुनाश्नीयात्प्राजापत्यमिदंव्रतम् २३
गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम्
दिनद्वयंपिबेद्विप्रचैकरात्रमुपोषितः
सर्वपापहरंकृच्छ्रंमुनेसांतपनंस्मृतम् २४
ग्रासंत्र्यहंतुचैकैकंप्रातःसायमयाचितम्
अद्यात्त्र्यहंचोपवसेदतिकृच्छ्रमिदंव्रतम् २५
प्रतित्र्यहंपिबेदुष्णंजलंक्षीरंघृतंद्विज
सकृत्स्नायीतप्तकृच्छ्रंस्मृतंपापहरंमुने २६
अभोजनंद्वादशाहंकृच्छ्रोऽयपापनाशनः
पराकोनामविज्ञेयःप्रसिद्धश्चतपोधन २७

एकैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रासयेत्
इंदुक्षयेनभुंजीतचांद्रायणव्रतंस्मृतम् २८
अश्नीयाच्चतुरःप्रातःपिंडान्विप्रसमाहितः
चतुरोऽस्तमितेचार्केशिशुचांद्रायणंस्मृतम् २९
कूष्मांडघातीयानारीपंचगव्यंपिबेत्त्र्यहम्
कूष्मांडपंचकंदद्यात्ससुवर्णंसवस्त्रकम्
तस्यावारितथाभक्तंग्राह्यंस्याद्वैतपोधन ३०
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेएकोनविंशोऽध्यायः १९

विंशतितमोऽध्यायः

शौनकउवाच
सुकृतंकिंतथाप्राहकृत्वासंसारसागरात्
तरिष्यंतिकलौसूततमोन्धकूपमंडुकाः १
सूतउवाच
राधाकृष्णप्रियेचौर्जेप्रातःस्नानंसमाचरेत्
राधादामोदरंभक्त्याकुर्यात्पूजांसमाहिता २
त्यक्त्वामिषादिकंब्रह्मन्पतिसेवापरायणा
सायातिश्रीहरेःस्थानंगोलोकाख्यंसुदुर्ल्लभम् ३
राधादामोदराभ्यांयाधूपदीपंतुकार्तिके
दद्यात्साभवनंविष्णोर्यातिवैत्यक्तपातकाः ४
योषिद्याकार्त्तिकेविप्रदद्याद्वस्त्रंनिकेतने
राधादामोदराभ्यांतुवसेत्साश्रीहरेश्चिरम् ५
राधादामोदराभ्यांसापुष्पंमाल्यंसुवासितम्
कार्तिकेमासिसादद्याद्यातिवैकुंठमंदिरम् ६
गंधंयाचापिनैवेद्यंदद्याद्वैशर्करादिकम्
राधादामोदराभ्यांसागच्छेद्वैविष्णुमंदिरम् ७
यत्किंचिद्यच्छतिब्रह्मन्कार्तिकेचद्विजातये
राधादामोदरप्रीत्यैतस्याःपुणयाक्षयंभवेत् ८
यानारीकार्तिकेभक्त्याराधादामोदरंद्विज
प्रातःसपर्यांसायातिनकुर्य्यान्निरयंचिरम् ९

कदाचिज्जन्मभूमौसाविधवाप्रतिजन्मनि
भवेच्चासाद्यपूर्व्ववैचाप्रियास्वामिनोऽपिच १०
पुरात्रेतायुगेविप्रवृषलोनामशंकरः
सौराष्ट्रदेशवासीचतस्यजायाकलिप्रिया ११
जाराकांक्षीसदानाम्नातृणवन्मन्यतेपतिम्
असौपतिर्नमेयोग्योमेस्वामीपरपूरुषः १२
इतिमत्वासदातस्मैचोच्छिष्टंतुददातिवै
नीचसंगान्महामूढामद्यमांसंचखादह १३
स्वामिनोभर्त्सनांनित्यंकुर्यात्कामंतुनिष्ठुरा
पादरज्जुर्भवेच्चासौकस्माद्दैनमृतोऽपिच १४
मृतेतस्मिन्नहंभोगंकरिष्यामियदृच्छया
विचार्येतिहृदामूढाजारेणैकेनसातदा १५
अन्यदेशंगमिष्यावःसंकेतमकरोद्द्विज
सुप्तस्यस्वामिनोरात्रौचासिनातद्गलंद्विज १६
छित्त्वाजारकृतेसापिसंकेतस्यस्थलंगता
आगतंजारपुरुषंद्वीपिनाभक्षितंद्विज १७
दृष्ट्वासारोदनंकृत्वामूर्च्छितानिपपातह
चिरादाश्वस्यसामूढाकरुणंविललापह १८
कलिप्रियोवाच
स्वकीयंस्वामिनंहत्वाचागतापरपूरुषम्
तंजारंस्वामिनंदैवात्शार्दूलोभक्षयन्मम
किंकरोमिक्वगच्छामिविधात्रावंचितास्म्यहम् १९
सूतउवाच
ततःकलिप्रियाब्रह्मन्आगतास्वगृहंप्रति
लपनेस्वामिनोदत्वामुखंचविललापसा २०
कलिप्रियोवाच
हानाथकिंकृतंकर्म्ममयाहंतातिदारुणम्
कंलोकंवागमिष्यामिवदस्वामिन्मनाग्गिरम् २१
भर्त्सनांतुयथाकामंकुर्य्यांच्चाहंसुनिंदिता
किंचिन्नवदसिस्वामिन्नेनोयन्मेनविद्यते २२

सूतउवाच
ननामचरणेतस्यगतान्यनगरंप्रति
तत्रप्रविष्टासायोषिद्दृष्ट्वापुरयजनान्बहून् २३
ऊर्जेस्नानपरान्प्रातर्नर्मदायांचवैष्णवान्
तत्रनद्यांस्त्रियश्चापिराधादामोदरंद्विज २४
सपर्याचकृतांचैवशंखनादैर्महोत्सवैः
गंधपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफलैः २५
मुखवासैर्भक्तियुक्तादृष्ट्वासाविनयान्विता
पप्रच्छब्रूतयूयंमेकिमेतत्क्रियतेस्त्रियः २६
स्त्रियऊचुः -
सर्वमासोत्तमेचोर्जेराधादामोदरौशुभौ
पूजांकृत्वावयंमातःसर्वपापहरांशुभाम् २७
कोटिजन्मार्जितंपापंनष्टंप्राप्तंनिकेतनम्
सपर्य्यामामिषंत्यक्त्वाकृत्वासाचहरेर्द्दिने २८
निधनत्वंपौर्णमास्यांगतासानिर्मलाद्विज
किंकराश्चागतास्तूर्णंयमस्यनिलयंप्रति २९
नेतुंतांक्रोधसंयुक्ताबबंधुश्चर्मरज्जुभिः
तदागताविष्णुदूताविमानंस्वर्णनिर्मितम् ३०
शंखचक्रगदापद्मधारिणोवनमालिनः
निजघ्नुश्चक्रधाराभिर्यमदूताःपलायिताः ३१
राजहंसयुतेविप्रविमानेस्वर्णनिर्मिते
आरूढासागतातैस्तुवेष्टिताविष्णुमंदिरम् ३२
तत्रतस्थौचिरंभोगंकृत्वासावैयथेप्सितम्
याकुर्यात्कार्त्तिकेविप्रराधादामोदरार्चनम् ३३
यातिपूजात्यक्तपापाद्गोलोकाख्यंमनोहरम्
यइदंशृणुयाद्भक्त्यायाचनारीसमाहिता
कोटिजन्मार्जितंपापंतस्यतस्याविनश्यति ३४

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादेराधादामोदरपूजा-
माहात्म्यकथनंनामविंशतितमोऽध्यायः २०

एकविंशोऽध्यायः

शौनकउवाच
कथयस्वमुनेसूतसर्वमासोत्तमस्यच
कार्तिकस्यविधिंसम्यङ्नियमान्वक्तुमर्हसि १
सूतउवाच
आश्विनस्यद्विजश्रेष्ठपौर्णमास्यांसमाहितः
कार्तिकस्यव्रतंकुर्याद्यावदुद्बोधिनीभवेत् २
दिवाविप्रनरःकुर्यान्मलमूत्रमुदङ्मुखः
भवेन्मौनीचसर्वज्ञरात्रौचेद्दक्षिणामुखः ३
पथ्यंभसिचगोष्ठेषुश्मशानेवल्मिकेद्विज
कुर्यादुत्सर्जनंनैवव्रतीमूत्रपुरीषयोः ४
अत्युत्तमेषुस्थानेषुमलमूत्रंनकारयेत्
शिुद्धांमृदंगृहीत्वाथवामंप्रक्षालयेत्करम् ५
अद्भिर्मृदापिशुद्ध्यर्थंपूर्वंविंशतिसंख्याा
एकालिगेगुदेपंचतथावामकरेदश ६
उभयोर्दशदातव्यापादयोश्चत्रिभिस्त्रिभिः
मुखशुद्धिंततःकुर्य्यात्संकल्पंस्नपनस्यच ७
हृदिदामोदरंध्यात्वाइमंमंत्रंततोवदेत्
कार्तिकेहंकरिष्यामिप्रातःस्नानंजनार्द्दन ८
दामोदरस्यप्रीत्यर्थंराधयापापनाशनं
नमःपंकजनाभायश्रीकृष्णजलशायिने ९
नमस्तेराधयासार्द्धंगृहाणार्घंप्रसीदमे
स्नानंकुर्य्यात्ततोविप्रतिलकंतुयथाविधि १०
ऊर्ध्वपुंड्रविहीनस्तुकिंचित्कर्मकरोतियः
निष्फलंकर्मतत्सर्वंसत्यमेतन्मयोच्यते ११
यच्छरीरंमनुष्याणामूर्ध्वपुंड्रंविनाकृतम्
तद्दर्शनंनकर्तव्यंदृष्ट्वासूर्यंनिरीक्षयेत् १२
ऊर्ध्वपुंड्रंमृदाशुभ्रंललाटेयस्यदृश्यते
चांडालोऽपिविशुद्धात्मापूज्यएवनसंशयः
अच्छिद्रमूर्ध्वपुंड्रंतुयेकुर्वंतिनराधमाः १३

तेषांललाटेसततंशुनःपादोनसंशयः
प्रातःकालोदितंकर्म्मसमाप्यहरिवल्लभाम् १४
पूजयेद्भक्तितोविप्रतुलसींपापनाशिनीम्
पौराणींतुकथांश्रुत्वाश्रीहरेःस्थिरमानसः १५
ततोविप्रंव्रतीभक्त्यापूजयेत्तंयथाविधि
परासनंपरान्नंचपरशय्यांपरांगनाम् १६
सर्वदावर्जयेद्विप्रकार्त्तिकेचविशेषतः
सौवीरकंतथामाषानामिषंचतथामधु १७
राजमाषादिकंनित्यंवर्जयेत्कार्तिकेव्रती
जंबीरमामिषंचूर्णमन्नंपर्य्युषितंद्विज १८
धान्येमसूरिकाप्रोक्तागवांदुग्धमनामिषम्
लवणंभूमिजंविप्रप्राणयङ्गमामिषंखलु १९
द्विजक्रीतारसाःसर्वेजलंचाल्पसरःस्थितम्
ब्रह्मचर्यंतुर्यकालेपत्रावल्यांचभोजनम् २०
कुर्याद्वैद्विजशार्दूलतैलाभ्यंगंचवर्जयेत्
छत्राकंनालिकंहिंगुंपलांडुंपूतिकादलम् २१
लशुनंमूलकंशिग्रुंतथैवतुंबिकाफलम्
कपित्थंचैववृंताकंकूष्मांडंकांस्यभोजनम् २२
द्विपाचितंसूतिकान्नंमत्स्यंशय्यांरजस्वलाम्
द्विस्त्रिश्चान्नंस्त्रियःसंगंवर्जयेत्कार्तिकव्रती २३
धात्रीफलंगृहीविप्रवौतत्सर्वदात्यजेत्
कूष्मांडेधनहानिःस्यात्बृहत्यांनस्मरेद्धरिम् २४
पटोलेतुनवृद्धिःस्याद्बलहानिश्चमूलके
कलंकीजायतेविल्वेतिर्यग्योनिश्चनिंबुके २५
तालेशरीरनाशःस्यान्नारिकेलेचमूर्खता
तुंबीगोमांसतुल्यास्याद्गोवधंस्यात्कलिदके २६
शिंबीपापकराप्रोक्तापूतिकाब्रह्मघातिका
वार्ताक्यांसुतनाशःस्याच्चिररोगीचमाषके २७
मांसेचबहुपापंस्याद्वर्जयेत्प्रतिपदादिषु
यतिंकचिद्वर्जयेद्योऽन्नश्रीहरेप्रीतयेद्विज २८

तत्पुनर्भूसुरेदत्वाव्रतांतेतस्यभोजनम्
कार्तिकव्रतिनंविप्रयथोक्तकारिणंनरम् २९
यमदूताःपलायंतेसिंहंदृष्ट्वायथागजाः
श्रेष्ठंविष्णुव्रतंविप्रतत्तुल्यानशतंमखाः ३०
कृत्वाक्रतुंव्रजेत्स्वर्गंवैकुंठंकार्तिकव्रती
यत्किंचिद्दुष्कृतंविप्रमनोवाक्कायकर्मजम् ३१
दृष्ट्वातुविलयंयातिकार्तिकव्रतिनंक्षणात्
कार्त्तिकव्रतिनःपुण्यंब्रह्माचैवचतुर्मुखः ३२
नसमर्थोभवेद्वक्तुंयथोक्तव्रतकारिणः
यत्कृत्वाकलुषंसर्वंव्रजेद्विप्रदशोदिशः ३३
क्वगच्छामिक्वतिष्ठामिकार्त्तिकव्रतिनोभयात्
पौर्णमास्यांयथाशक्तिचान्नवस्त्रादिकंद्विज ३४
दद्याद्वैश्रीहरेःप्रीत्यैब्राह्मणानपिभोजयेत्
रात्रौजागरणंकुर्यान्नृत्यगीतादिभिर्व्रती
यइदंशृणुयाद्भक्त्यातस्यपापंप्रणश्यति ३५
इति श्रीपाद्मेमहापुराणेसूतशौनकसंवादेब्रह्मखंडेएकविंशोऽध्यायः २१

द्वाविंशोऽध्यायः

शौनकउवाच
माहात्म्यंब्रूहिसर्वज्ञशृण्वतांपापनाशनम्
सर्वप्राणिहितार्थायतुलस्याश्चनुकंपया १
सूतउवाच
तुलस्याःपरिसरेयस्यकाननंतिष्ठतिद्विज
गृहस्यतीर्थरूपत्वान्नायांतियमकिंकराः २
तुलस्याःकाननंविप्रसर्वपापहरंशुभम्
रोपयंतिनराःश्रेष्ठास्तेनपश्यंतिभास्करिम् ३
रोपणंपालनंसेवांदर्शनंस्पर्शनंतुयः
कुर्य्यात्तस्यप्रणष्टंस्यात्सर्वपापंद्विजोत्तम ४
कोमलैस्तुलसीपत्रैरर्चयंतिहरिंतुये
कालस्यसदनंविप्रतेनयांतिमहाशयाः ५

गंगाद्याःसरितःश्रेष्ठाविष्णुब्रह्ममहेश्वराः
देवैस्तीर्थैःपुष्कराद्यैस्तिष्ठंतितुलसीदले ६
योयुक्तस्तुलसीपत्रैःपापीप्राणान्विमुञ्चति
विष्णोर्निकेतनंयातिसत्यमेतन्मयोदितम् ७
तुलसीमृत्तिकालिप्तोयुक्तःपापशतैरपि
विमुंचतिनरःप्राणान्सयातिहरिमन्दिरम् ८
योनरोधारयेद्विप्रतुलसीकाष्ठचंदनम्
तस्याङ्गंनस्पृशेत्पापंसयातिपरमंपदम् ९
तुलसीकाष्ठमालांतुकराठस्थांवहतेतुयः
अप्यशौचोप्यनाचारोभक्त्यायातिहरेर्गृहम् १०
धात्रीफलकृतामालातुलसीकाष्ठसंभवा
दृश्यतेयस्यदेहेतुसवैभागवतोनरः ११
तुलसीदलजांमालांकराठस्थांवहतेतुयः
विष्णूच्छिष्टांविशेषेणसनमस्योदिवौकसाम् १२
यःपुनस्तुलसीमालांकराठेकृत्वाजनार्दनम्
पूजयेत्पुरायमाप्नोतिप्रतिपुष्पंगवायुतम् १३
धारयन्तिनयेमालांहैतुकाःपापबुद्धयः
नरकान्ननिवर्तंतेदग्धाःकोपाग्निनाहरेः १४
नजह्यात्तुलसीमालांधात्रीमालांविशेषतः
महापातकसंहर्त्रींधर्मकामार्थदायिनीम् १५
स्पृशेद्वयानिलोमानिधात्रीमालाकलौनृणाम्
तावद्वर्षसहस्राणिवसतेकेशवालये १६
निवेद्यकेशवेमालांतुलसीकाष्ठसंभवाम्
वहतेयोनरोभक्त्यातस्यवैनास्तिपातकम् १७
तुलसीकाष्ठमालांतुप्रेतराजस्यदूतकाः
दृष्ट्वानश्यन्तिदूरेणवातोद्धूतंयथादलम् १८
तुलस्याविपिनेधात्र्याश्छायासुयोनरोत्तमः
पिराडंददातिपितरोमुक्तिंयान्तिद्विजोत्तम १९
पाणौमूर्ध्निगलेचैवकर्णयोश्चमुखेद्विज
धात्रीफलंयस्तुधत्तेसविज्ञेयोहरिःस्वयम् २०

धात्रीपत्रैःफलैर्विप्रश्रीहरिंचार्चयेद्द्विज
कोटिजन्मार्जितंपापंपूजयानश्यतिसकृत् २१
यज्ञादेवाश्चमुनयस्तीर्थानिकार्तिकेद्विज
धात्रीवृक्षंसमाश्रित्यतिष्ठन्तिकार्तिकेसदा २२
धात्रीपत्रंकार्तिकेचद्वादश्यांतुलसीदलम्
चिनोतियोनरोगच्छेन्निरयंयातनामयम् २३
धात्रीछायासुयोविप्रचान्नंभुनक्तिकार्तिके
अन्नसंसर्गजंपापमावर्षंतस्यनश्यति २४
तुलसीवनमध्येचधात्रीमूलेचकार्तिके
कुर्याद्धर्यर्चनंविप्रवैकुण्ठंयातिसध्रुवम् २५
तुलसीमूलदेशेऽपिस्थितंवारिद्विजोत्तम
गृह्णातिमस्तकेभक्त्यापापीयातिहरेर्गृहम् २६
तुलसीपत्रगलितंयस्तोयंशिरसावहेत्
सर्वतीर्थेषुसस्नातश्चांतेयातिहरेर्गृहम् २७
पुराकश्चिद्द्विजश्रेष्ठोद्वापरेऽभून्महामुने
स्नात्वैकदातुलस्यैसवनंदत्वागृहंगतः २८
आदित्योवर्चसानाम्नामार्त्तंडइवपुण्यतः
तृषार्तोभक्षकःकश्चिदागतोबहुकल्मषः २९
तुलस्यामूलतस्तोयंपीत्वाचासौहतांहसः
त्वरयाप्यागतोव्याधोनाम्नायश्चासिमर्द्दनः ३०
उवाचभुक्तंचान्नंचभुक्त्वाभग्नंगतःकिमु
कृत्वामेपाकभांडस्थंचागतोहिंसकस्यते ३१
विव्याधतंगतप्राणंनेतुंवैशमनाज्ञया
आगताःकिंकराःक्रुद्धाःपाशमुद्गरपाणयः ३२
बद्ध्वानेतुंमनश्चक्रुरागताविष्णुकिंकराः
तदाछित्त्वाचर्मपाशंस्यंदनेतंमनोहरे ३३
तूर्णमारोहयामासुःपप्रच्छुर्विनयान्विताः
तेऽपिपुण्येनभोःसंतःकेनवैनीयतेऽप्यसौ ३४
ऊचुस्तेऽसौपुराराजापुण्यंबहुतरंकृतम्
अकरोद्धरणांकांचित्सुंदरींचांगनामयम् ३५

अनेनचांहसाराजागतोवैशमनक्षयम्
तत्रक्लेशंतुयुष्माभिर्दत्तंवैशमनाज्ञया ३६
ताम्रमय्यास्त्रियासार्द्धंक्रीडांसुप्त्वाचकारसः
तप्तायांलोहशय्यायांवैक्लव्यंकर्मणानृप ३७
तप्तायोभीषणंतप्तंलोहस्तंभंयमाज्ञया
ततःस्थितःसमालिंग्यभुक्त्वादुःखंचिरंनृपः ३८
सिक्तःक्षारांबुधाराभिरन्यैर्वैशमनालये
ततोनरकशेषेचपापयोनौमुहुर्मुहुः ३९
जन्मासाद्यचिरंदुःखमनुभूतंस्वकर्मणा
तुलसीमूलकंवारिपीत्वायातिहरेर्गृहम् ४०
इदानींतद्वचःश्रुत्वागतादूतायथागताः
तेनसार्द्धंविष्णुदूतागतावैकुंठमंदिरम् ४१
माहात्म्यंकथितंब्रह्मन्तुलस्याःपापनाशनम्
कुर्वंतिसेवांयेभक्त्यानजानेकिंभवेन्मुने ४२
इति श्रीपाद्मेमहापुराणेब्रह्मखराडेसूतशौनकसंवादेतुलस्या
माहात्म्यंनामद्वाविंशोऽध्यायः २२

त्रयोविंशोऽध्यायः

शौनकउवाच
कथयस्वमुनेसूतमाहात्म्यंकलुषक्षयम्
शेषपंचदिनस्यापिकार्त्तिकस्यानुकंपया १
सूतउवाच
शृणुशौनकयत्पृष्टंमाहात्म्यंपापनाशनम्
वक्ष्याम्यहंवैचोर्जस्यशेषपंचदिनस्यच २
व्रतानांमुनिशार्दूलप्रवरंविष्णुपंचकम्
तस्मिन्यःपूजयेद्भक्त्याश्रीहरिंराधयासह ३
गंधपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफलैः
सयातिविष्णुसदनंसर्वपापविवर्जितः ४
ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथवायतिः
नप्राप्नोतिपरंस्थानमकृत्वाविष्णुपंचकम् ५

सर्वपापहरंपुरायंविख्यातंविष्णुपंचकम्
तत्रस्नानंतुयःकुर्यात्सर्वतीर्थफलंलभेत् ६
श्रीहरेःपुरतोविप्रतुलस्याश्चसमीपतः
प्रदीपंसर्पिषापूर्णंदद्याद्योभक्तिभावतः ७
नभसिश्रीहरेःप्रीत्यैयातिसविष्णुमंदिरम्
पापीयातिहरेर्धामसत्यमेतन्मयोदितम् ८
स्नापयेच्चाच्युतंभक्त्यामधुक्षीरघृतादिभिः
दद्यातिंकनोहरिःप्रीतस्तस्मैसाधुजनायवै ९
नैवेद्यंदेवदेवेशंपरमान्नंनिवेदयेत्
तस्यपुरायंप्रसंख्यातुंनशक्तोवैचतुर्मुखः १०
अर्चयित्वाहृषीकेशमेकादश्यांसमाहितः
निष्प्राप्यगोमयंसम्यक्मंत्रवत्समुपासते ११
गोमूत्रंमंत्रवद्भूयोद्वादश्यांप्राशयेद्व्रती
क्षीरंतथात्रयोदश्यांचतुर्दश्यांतथादधि १२
संप्राप्यपापशुद्ध्यर्थंलंघयित्वाचतुर्दिनम्
पंचमेतुदिनेस्नात्वाविधिवत्पूज्यकेशवम् १३
भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणाम्
ततोनक्तंसमश्नीयात्पंचगव्यंसुमंत्रितम् १४
एवंकर्तुमशक्तोयःफलमूलंचभोजनम्
कुर्याद्धविष्यंवाविप्रयथोक्तविधिनाहवै १५
श्रीहरेःपंचकंविप्रकुर्याद्यस्तुलसीदलैः
पूजयेत्तंसविज्ञेयःस्वयंनारायणःप्रभुः १६
पुरात्रेतायुगेशूद्रोदस्युवृत्तिपरायणः
नाम्नादंडकरोनित्यंधर्मनिंदांकरोतियः १७
असत्यभाषीमित्रघ्नोवेश्याविभ्रमलोलुपः
ब्रह्मस्वहारीक्रूरश्चपरस्त्रीगमनेरतः १८
शरणागतहंताचपाखंडजनसंगभाक्
गोमांसाशीसुरापश्चपरनिंदाकरःसदा १९
विश्वासघातीज्ञातीनांवृत्तिच्छेदीद्विजोत्तम
दुष्टंसर्वेसमालोक्यतादृशंतद्गृहेद्विजः २०

आगताज्ञातयःक्रुद्धास्तस्यपापपरायणम्
ज्ञातयऊचुः
रेरेमूढदुराचारविनाशंप्रतिनीयते
याप्रतिष्ठार्जितापूर्वैरस्माकंनिर्मलेऽन्वये २१
इतिक्रुद्धाद्विजश्रेष्ठअपकीर्तिभयादपि
पापिनांप्रवरंसर्वेतत्यजुस्तंकुलादरम् २२
ततोगतोमहाररायंविनष्टाखिलवैभवः
कुर्यात्सदस्युभिःसार्द्धंदस्युकर्मनिरंतरम् २३
पथिप्रगच्छतांतेषांभयाद्विप्रनखादितुम्
प्राप्तंकिंचित्ज्ञुधार्त्तास्तेगताश्चान्यस्थलंप्रति २४
तत्रप्रविष्टास्तेसर्वेदृष्ट्वापुरायजनान्बहून्
धात्रीमूलेस्थितान्ब्रह्मन्वैष्णवान्द्विजसत्तमान् २५
सर्वेतेदस्यवोविप्रगतादंडकरोऽपिसः
तेषांपरिसरंगत्वाप्रणामंवैचकारह २६
दंडकरउवाच
ज्ञुधार्तोऽहद्विजश्रेष्ठाःप्राणायास्यंतिमेध्रुवम्
ददध्वंखादितुंकिंचिद्युष्माकंशरणंगतः २७
आकरार्यवचनंतस्यचोचुस्तेधर्मतत्पराः
सर्वपापहरेत्वंचविख्यातेविष्णुपंचके २८
कथमन्नंखादितुंतेवांछात्वद्यहरेर्दिने
विशेषंतेब्रूहिसंज्ञाकातेभवतिसांप्रतम् २९
सउवाचमुदाविप्रानाम्नादंडकरोप्यहम्
सर्वपापसमायुक्तश्चोद्धारोमेकथंभवेत् ३०
ऊचुस्तेवैव्रतंश्रेष्ठंकुरुष्वविष्णुपंचकम्
विप्राणामाज्ञयाविप्रचकारविष्णुपंचकम् ३१
सप्रेत्यचहरेःस्थानमारुह्यस्यंदनेवरे
आसाद्यश्रीहरेरूपंतस्थौजन्मविवर्जितः ३२
यइदंशृणुयाद्भक्त्याचाख्यानंपापनाशनम्
कोटिजन्मार्जितंपापंतस्यनश्यतितत्ज्ञणात् ३३
इति श्रीपाद्मेमहापुराणेब्रह्मखराडेसूतशौनकसंवादेविष्णुपंचक-

माहात्म्यंनामत्रयोविंशोऽध्यायः २३

चतुर्विंशतितमोऽध्यायः

शौनकउवाच
विदुषांवरतत्त्वज्ञकथयस्वमहामते
इदानींममदानानांमाहात्म्यंक्रमतोमुने १
सूतउवाच
क्षितिदानंमुनिश्रेष्ठदानानामुत्तमंमतम्
येनकृतंवैतद्दानंसर्वदानफलंमतम् २
क्षितिंससस्यांयोदद्याद्ब्राह्मणायद्विजोत्तम
विष्णुलोकेसुखंभुंक्तेयावदिंद्राश्चतुर्दश ३
पृथिव्यांजन्मचासाद्यसार्वभौमस्ततोनृपः
महींसर्वांचिरंभुक्त्वाव्रजेद्वैश्रीहरेर्गृहम् ४
गोचर्ममात्रांभूमिंयःप्रयच्छतिद्विजातये
सगच्छतिहरेर्गेहंसर्वपापविवर्जितः ५
शतंगावोवृषश्चैकोयत्रतिष्ठंत्ययंत्रिताः
गोचर्ममात्रांतांभूमिंप्रवदंतिमहर्षयः ६
भूमिनेताभूमिदाताद्वौचापिस्वर्गगामिनौ
ग्राह्याभूमिर्द्विजैःप्राज्ञैस्त्यक्त्वादानशतान्यपि ७
अज्ञानीभूसुरोयस्तुत्यजेद्भूमिंविमोहितः
प्रतिजन्मन्यसौविप्रोभवेच्चात्यंतदुःखभाक् ८
अन्यतोयःसमासाद्यदद्याद्भूमिंद्विजातये
तस्मैविप्रजगन्नाथोददातिपरमंपदम् ९
स्वदत्तांपरदत्तांचमेदिनींयोहरेद्द्विज
युक्तःकोटिकुलैर्यातिनरकंचातिदारुणम् १०
हरेद्योवैमहींविप्रदेवब्राह्मणयोरपि
नदृष्टानिष्कृतिस्तस्यकोटिकल्पशतैर्मुने ११
भूमिंयोपरदत्तांचरक्षतिक्ष्मापतिर्द्विज
पुण्यंकोटिगुणंस्याद्वैतस्यदानंजनादपि १२
सप्तद्वीपांमहींदत्त्वायत्पुण्यंप्राप्यतेद्विज

तत्पुरायंप्राप्नुयान्मर्त्योधेनुंयच्छन्द्विजातये १३
ददातिवृषभंयस्तुदरिद्रायकुटुंबिने
सर्वपापविनिर्मुक्तोशिवलोकंसगच्छति १४
तिलप्रमाणंस्वर्णंयोब्राह्मणायप्रयच्छति
हरेर्निकेतनंयातियुक्तःकोटिकुलैरपि १५
योदद्याद्रजतंविप्रसाधवेभूसुरायवै
प्राप्नोतिचंद्रलोकंचपिबेत्तत्रामृतंसदा १६
प्रवालंमौक्तिकंचैवहीरकंचमणिंतथा
योददातिद्विजश्रेष्ठस्वर्गलोकंसगच्छति १७
तुलापुरुषदानेनयत्पुरायंलभतेजनः
शालग्रामशिलांदत्त्वातस्मात्कोटिगुणंलभेत् १८
सप्तद्वीपांक्षितिंदत्वासशैलवनकाननाम्
यत्पुरायंलभतेतद्वैशालग्रामशिलाप्रदः १९
शालग्रामशिलांयोवैदद्याद्भूमिसुरायच
तेनविप्रप्रदत्तानिभुवनानिचतुर्दश २०
तुलापुरुषदानंयःकरोतिद्विजपुंगव
जनन्याश्चोदरेतस्यपुनर्जन्मनविद्यते २१
सालंकारांद्विजश्रेष्ठकन्यांयच्छतियोनरः
सगच्छेद्ब्रह्मसदनंपुनर्जन्मनविद्यते २२
कन्याविक्रयिणोनास्तिनरकान्निष्कृतिःपुनः
कन्यादानकृतोनास्तिस्वर्गादागमनंपुनः २३
उपानहौवातपत्रंयोददातिद्विजातये
प्रेत्यचेंद्रपुरंगत्वावसेत्कल्पचतुष्टयम् २४
वस्त्रंयच्छतियोदिव्यंसाधवेवैद्विजायते
स्वर्गेदिव्यांबरधरश्चिरंतिष्ठेद्द्विजोत्तम २५
धेनुंपुरातनींयच्छेद्वस्त्रंचजरितंद्विज
नूत्नांरजोवतींकन्यांसगच्छेन्निरयंतथा २६
कन्याविक्रयिणोब्रह्मन्नपश्येल्लपनंबुधः
दृष्ट्वाचाज्ञानतोवापिकुर्य्यान्मार्तंडदर्शनम् २७
फलदातानरोगच्छेत्त्रिदिवंचद्विजोत्तम

भुंक्तेकल्पसहस्राणिफलंतत्रामृतोपमम् २८
शाकंयच्छतियोमर्त्योशिवस्यभवनंद्विज
यातिकल्पद्वयंभुंक्तेदुर्ल्लभंपायसंसुरैः २९
घृतदोदधिदश्चैवतक्रदोदुग्धदस्तथा
विष्णोर्निकेतनंगत्वासुधापानंकरोतिसः ३०
गंधदःपुष्पदश्चैवमर्त्योयातिसुरालयम्
तिष्ठेद्युगसहस्राणिगंधपुष्पविभूषितः ३१
शय्यादानंदानसारंब्राह्मणायददातियः
सयातिब्रह्मसदनंपर्य्यंकेशेरतेचिरम् ३२
पीठदातादीपदातासर्वदुष्कृतवर्जितः
स्वर्गेसिंहासनेतिष्ठेज्ज्वलद्दीपावलीवृतः ३३
तांबूलंयोनरोदद्याद्भूमिंभुंक्तेऽखिलांसुखम्
स्वर्गेदेवांगनाक्रोडेसुप्तस्तांबूलमत्तिवै ३४
विद्यादानंदानवरंकरोतियोनरोत्तमः
प्रेत्यससन्निधिंविष्णोस्तिष्ठेद्युगशतत्रयम् ३५
प्राप्यज्ञानंततस्तत्रदुर्ल्लभंवैद्विजर्षभ
दुर्ल्लभंमोक्षमाप्नोतिश्रीहरेःकृपयाद्विज ३६
अनाथंदुःखितंविप्रंपाठयेद्वैनरोत्तमः
श्रीहरेर्भवनंयातिपुनर्जन्मविवर्जितः ३७
योनरःपुस्तकंदद्याद्भक्तिश्रद्धासमन्वितः
प्रतिवर्णंलभेत्पुण्यंकपिलाकोटिदानजम् ३८
मधुदोगुडदश्चैवमर्त्योयातीक्षुसागरम्
लवणप्रदोनरोयातिवारुणंलोकमेवच ३९
सर्वेषामेवदानानामन्नंवारिद्विजोत्तम
तत्त्वज्ञैर्मुनिभिःसर्वैःप्रवरंवैप्रकीर्त्तितम् ४०
अन्नंवारिद्विजश्रेष्ठयेनदत्तंमहीतले
तेनदत्तानिदानानिसर्वाणिचद्विजर्षभ ४१
अन्नदोयोनरोविप्रप्राणदश्चप्रकीर्त्तितः
तस्मात्समस्तदानानामन्नदोलभतेफलम् ४२
यथाचान्नंतथावारिद्वेतुल्येचप्रकीर्त्तिते

वारिणाचविनाचान्नंसिद्धंनस्याद्द्विजोत्तम ४३
क्षुधातृषाद्विजव्याघ्रद्वेचतुल्येप्रकीर्त्तिते
अतश्चान्नंचतोयंचश्रेष्ठंरंपोक्तंबुधैरपि ४४
अन्नदानंक्षितौब्रह्मन्येकुर्वंतिनरोत्तमाः
सर्वपापविनिर्मुक्तागच्छंतिहरिमंदिरम् ४५
यावंत्यन्नानिभोविप्रयच्छतिक्षितिमंडले
ब्रह्महत्याश्चतावंत्योनश्यंत्येवतपोधन ४६
यच्छतांचान्नदानानिशरीराणिचपातकम्
गात्राणिगृह्णतांत्यक्त्वासहसायांतिशौनक ४७
अतःपापिष्ठचान्नानिनगृह्णंतिमनीषिणः
गृह्णंतिमोहाद्येमूढाभवंतिपापभागिनः ४८
कुर्याद्भूमिष्ठमुदकंचैकंभोद्विजसत्तम
सर्वपापैर्विनिर्मुक्तोव्रजेत्सहरिमंदिरम् ४९
प्रयत्नेनद्विजश्रेष्ठकर्त्तव्योधनसंचयः
संचितंचधनंब्रह्मन्दानकर्मणिविक्षिपेत् ५०
रक्षंतियेचकार्पण्याद्धनंतेचातिदुःखिनः
अंतेसर्वधनंत्यक्त्वानिःस्वागच्छंतिभोमुने ५१
मानवायेसदादानंदत्त्वादत्त्वादरिद्रति
दरिद्रास्तेनविज्ञेयानरलोकेमहेश्वराः ५२
परलोकेद्विजव्याघ्रसाधुसंयमवर्जिते
निर्दयेबंधुहीनेचनदत्तंनोपतिष्ठते ५३
स्थितेधनेनरोयोवैनाश्नातिनददातिसः
दरिद्रइवविज्ञेयःप्रेत्यनिश्वासमुत्सृजेत् ५४
तपसोऽपिवरंदानंप्रोक्तंचतत्त्वदर्शिभिः
अतोयत्नाद्द्विजश्रेष्ठदानकर्मसमाचरेत् ५५
दातादानंनदद्याद्वैसमुत्सृज्यद्विजातये
सयातिनिरयंघोरंसर्वजंतुभयावहम् ५६
दानंदाताप्रतिग्राहीनस्मरेच्चनयाचते
निरयेचोभयोर्वासोयावच्चंद्रदिवाकरौ ५७
ब्रह्महत्यादिपापानियानिवैद्विजसत्तम

तानिदानेनहन्यंतेतस्माद्दानंसमाचरेत् ५८
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादे
चतुर्विंशतितमोऽध्यायः २४

पंचविंशतितमोऽध्यायः

शौनकउवाच
श्रीपदंविष्णुचरितंसर्वोपद्रवनाशनम्
सर्वपापक्षयकरंदुष्टग्रहनिवारणम् १
विष्णुसान्निध्यदंचैवचतुर्वर्गफलप्रदम्
यःशृणोतिनरोभक्त्याचांतेयातिहरेर्गृहम् २
नामोच्चारणमाहात्म्यंश्रूयतेमहदद्भुतम्
यदुच्चारणमात्रेणनरोयायात्परंपदम् ३
तद्वदस्वाधुनासूतविधानंनामकीर्तने
सूतउवाच
शृणुशौनकवक्ष्यामिसंवादंमोक्षसाधनम् ४
नारदःपृष्टवान्पूर्वंकुमारंतद्वदामिते
एकदायमुनातीरेनिविष्टंशांतमानसम् ५
सनत्कुमारंपप्रच्छनारदोरचिताञ्जलि
श्रुत्वानानाविधान्धर्मान्धर्मव्यतिकरांस्तथा ६
श्रीनारदउवाच
योऽसौभगवताप्रोक्तोधर्मव्यतिकरोनृणाम्
कथंतस्यविनाशःस्यादुच्यतांभगवत्प्रिय ७
श्रीसनत्कुमारउवाच
शृणुनारदगोविंदप्रियगोविंदधर्मवित्
यत्पृष्टंलोकनिर्मुक्तिकारणंतमसःपरम् ८
सर्वाचारविवर्जिताःशठधियोव्रात्याजगद्वञ्चकाः
दंभाहंकृतिपानपैशुनपराःपापाश्चयेनिष्ठुराः ९
येचान्येधनदारपुत्रनिरताःसर्वेऽधमास्तेऽपिहि
श्रीगोविंदपदारविंदशरणाःशुद्धाभवंतिद्विज १०
तमपिदेवकरंकरुणाकरस्थविरजंगममुक्तिकरंपरम्

अतिचरंत्यपराधपराजनायइहतान्वपतिध्रुवनामहि ११
सर्वापराधकृदपिमुच्यतेहरिसंश्रयः
हरेरप्यपराधान्यःकुर्याद्द्विपदपांसनः १२
नामाश्रयःकदाचित्स्यात्तरत्येवसनामतः
नाम्नोहिसर्वसुहृदोऽह्यपराधात्पतत्यधः १३
श्रीनारदउवाच
केतेऽपराधाविप्रेंद्रनाम्नोभगवतःकृताः
विनिघ्नंतिनृणांकृत्यंप्राकृतंह्यानयंतिच १४
श्रीसनत्कुमारउवाच
सतांनिंदानाम्नःपरममपराधंवितनुते
यतःख्यातिंयांतंकथमुसहतेतद्विगरहाम्
शुभस्यश्रीविष्णोर्यइहगुणनामादिसकलं
धियाभिन्नंपश्येत्सखलुहरिनामाहितकरः १५
गुरोरवज्ञाश्रुतिशास्त्रनिंदनंतथार्थवादोहरिनाम्निकल्पनम्
नामापराधस्यहिपापबुद्धिर्नविद्यतेतस्ययमैर्हिशुद्धिः १६
धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपिप्रमादः
अश्रद्दधानोविमुखोऽप्यशृणवन्यश्चोपदेशःशिवनामापराधः १७
श्रुत्वापिनाममाहात्म्यंयःप्रीतिरहितोऽधमः
अहंममादिपरमोनाम्निसोऽप्यपराधकृत् १८
एवंनारदशंकरेणकृपयामह्यंमुनीनांपरं
प्रोक्तंनामसुखावहंभगवतोवर्ज्यंसदायत्नतः
येज्ञात्वापिनवर्जयंतिसहसानाम्नोऽपराधान्दश
क्रुद्धामातरमप्यभोजनपराःखिद्यंतितेबालवत् १९
अपराधविमुक्तोहिनाम्निजप्तंसदाचर
नाम्नैवतवदेवर्षेसर्वंसेत्स्यतिनान्यतः २०
श्रीनारदउवाच
सनत्कुमारप्रियसाहसानांविवेकवैराग्यविवर्जितानाम्
देहप्रियार्थात्मपरायणानांमुक्तापराधाःप्रभवंतिनःकथम् २१
श्रीसनत्कुमारउवाच
जातेनामापराधेतुप्रमादेतुकथंचन

सदासंकीर्तयन्नामतदेकशरणोभवेत् २२
नामापराधयुक्तानांनामान्येवहरंत्यघम्
अविश्रांतिप्रयुक्तानितान्येवार्थकराणियत् २३
नामैकंयस्यचिह्नंस्मरणपथगतंश्रोत्रमूलंगतंवा
शुद्धंवाऽशुद्धवर्णंव्यवहितरहितंतारयत्येवसत्यम्
तच्चेद्देहद्रविणजनितालोभपाखण्डमध्ये
निक्षिप्तंस्यान्नफलजनकंशीघ्रमेवात्रविप्र २४
इदंरहस्यंपरमंपुरानारदशंकरात्
श्रुतंसर्वाशुभहरमपराधनिवारकम् २५
विदुर्विष्णवभिधानंयेह्यपराधपरानराः
तेषामपिभवेन्मुक्तिःपठनादेवनारद २६
नाम्नोमाहात्म्यमखिलंपुराणेपरिगीयते
ततःपुराणमखिलंश्रोतुमर्हसिमानद २७
पुराणश्रवणेश्रद्धायस्यस्याद्भ्रातरन्वहम्
तस्यसाक्षात्प्रसन्नःस्याच्छिवोविष्णुश्चसानुगः २८
यत्स्नात्वापुष्करेतीर्थेप्रयागेसिंधुसंगमे
तत्फलंद्विगुणंतस्यश्रद्धयावैशृणोतियः २९
येपठंतिपुराणानिशृण्वंतिचसमाहिताः
प्रत्यक्षरंलभंत्येतेकपिलादानजंफलम् ३०
अपुत्रोलभतेपुत्रंधनार्थीलभतेधनम्
विद्यार्थीलभतेविद्यांमोक्षार्थीमोक्षमाप्नुयात् ३१
येशृण्वंतिपुराणानिकोटिजन्मार्जितंखलु
पापजालंतुतेहत्वागच्छंतिहरिमंदिरम् ३२
पुराणवाचकंविप्रंपूजयेद्भक्तिभावतः
गोभूहिरण्यवस्त्रैश्चगंधपुष्पादिभिर्मुने ३३
कांस्यैर्विनिर्मितंपात्रंजलपात्रंमुदान्वितः
कर्णकुंडलकंचैवमुद्रिकांस्वर्णनिर्मिताम् ३४
आसनंतुतथादद्यात्पुष्पमाल्यंतपोधन
वित्तशाठ्यंनकुर्वीतदानंहीनफलंयतः ३५
पुराणंवाचयेद्विप्रसर्वकामार्थसिद्धये

सुवर्णंरजतंवस्त्रंपुष्पमाल्यंतुचंदनम् ३६
दद्याद्योपुस्तकंभक्त्यासगच्छेद्धरिमंदिरम्
कुर्वंतिविधिनानेनसंपूर्णंपुस्तकंचये
तेषांनामानिलिपेतचित्रगुप्तोऽचनाद्द्विज ३७
इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादे
पंचविंशतितमोऽध्यायः २५

षड्विंशतितमोऽध्यायः
शौनकउवाच
श्रोतुमिच्छामितेप्राज्ञकथयस्वसमूलकम्
प्रतिज्ञापालनेपुरायंखंडनेकिंचकिल्बिषम् १
अनृतेशपथेकिंवासत्येकिंचिद्भवेन्मुने
दक्षिणांकिंकरंदत्वाकृपांकृत्वाकृपार्णव २
सूतउवाच
शृणुष्वमुनिशार्दूलकथयामिसमूलतः
वैष्णवानांत्वमग्रयोऽसिसर्वलोकहितेरतः ३
धेनूनांतुशतंदत्त्वायत्फलंलभतेनरः
तस्मात्कोटिगुणंपुरायंप्रतिज्ञापालनेद्विज ४
प्रतिज्ञाखंडनान्मूढोनिरयंयातिदारुणम्
शतमन्वंतरंयावत्पच्यतेनात्रसंशयः ५
ततोऽत्रजन्मचासाद्यनिर्धनस्यनिकेतने
अन्नवस्त्रैर्विहीनःस्याक्लेशीचापिस्वकर्मणा ६
सत्येनशपथंकुर्याद्देवाग्निगुरुसन्निधौ
तावद्दहतिवैगात्रंविष्णोर्वंशोनलुप्यते ७
मिथ्यायांशपथेविप्रकिमहंवच्मिसांप्रतम्
शतमन्वंतरंविप्रनिरयंमिथ्ययाकिमु ८
निर्माल्यंश्रीहरेःस्पृष्ट्वासत्येनमुनिपुंगव
गृहीत्वापुरुषान्सप्तपच्यतेनिरयेचिरम् ९
कदाचिज्जन्मसंप्राप्यकुष्ठीचप्रतिजन्मनि
सत्येनैवंभवेद्विप्रअनृतेवैकिमुच्यते १०

योमर्त्योदक्षिणांदत्वाकरंतत्प्रतिपाल्यते
तस्यप्राप्तिर्भवेत्कृष्णःसत्यंसत्यंवदाम्यहम् ११
करंदत्त्वातुयोमर्त्योवचनस्यचपालनम्
तावन्नकुर्यात्पितरःप्राप्नुवंतिचयातनाम् १२
स्वयंतुमुनिशार्दूलनिरयंचातिदारुणम्
उद्धारंकोटिपुरुषैर्मृतोयातिनसंशयः १३
शौनकउवाच
कृष्णप्राप्तिःपुराकस्यकरस्यप्रतिपालनात्
दक्षिणस्यमुनेब्रूहिश्रोतुमिच्छामिसादरात् १४
सूतउवाच
पुराकिंचित्पुरेशूद्रोनाम्नासीद्वीरविक्रमः
बह्वाशीपृथुलांगश्चबहुवक्तातिसुंदरः १५
धनवान्पुत्रवान्सभ्योविद्वान्सर्वजनप्रियः
विप्राणामतिथीनांचपूजकःसर्वदैवतु १६
पितृभक्तोद्विजश्रेष्ठप्रतिज्ञापालकःसदा
वाचांगुरुजनानांचपालकोहरिसेवकः १७
एकदासुंदरोगेहंश्वपचस्तस्यछद्मना
प्राप्तोधृत्वाब्राह्मणस्यरूपंवैतरुणःसुधीः १८
ब्राह्मणउवाच
शृणुमेवचनंधीरममजायामृताशुभा
किंकरोमिक्वगच्छामिकथयाद्यानुकंपया १९
विवाहंयोजनःकुर्याद्ब्राह्मणंचविशेषतः
किंचदानैःकिंचतीर्थैःकिंयज्ञैर्व्रतकोटिभिः २०
इतिश्रुत्वात्वसौविप्रंचोक्तवान्वीरविक्रमः
शृणुमेवचनंब्रह्मन्बालास्तिममकन्यका २१
यदिच्छातेभवेद्विप्रदास्यामिविधिपूर्वकम्
नयमेदक्षिणंहस्तंदास्यामिचान्यथानहि २२
तस्यैतद्वचनंश्रुत्वाजग्राहदक्षिणंकरम्
श्वपचोहर्षयुक्तोवैप्रोवाचवचनंत्विति २३
ब्राह्मणउवाच

कृत्वाशुभक्षणंमह्यंदेहिकन्यांशुभान्विताम्
विलंबेबहुविघ्नंस्यादितिशास्त्रेषुनिश्चितम् २४
वीरविक्रमउवाच
तुभ्यंश्वःकन्यकांब्रह्मन्दास्यामिनास्तिचान्यथा
दक्षिणांचकरंदत्वानकुर्यात्पुरुषाधमः २५
सूतउवाच
ब्राह्मणंकृष्णशर्माणंचाहूयाकथयन्मुने
पुरोहितमिदंसर्वंप्रोवाचसंविदंद्विज २६
कथंविप्रायतेकन्यांशूद्रायदातुमिच्छसि
अज्ञातायाकुलीनायनददस्वविशेषतः २७
ऊचुस्तज्ज्ञातयःसर्वेजनकाद्यास्तपोधन
अस्माकंवचनंतातश्शृणुष्ववीरविक्रम २८
नज्ञायतेकुलंयस्यदेशगोत्रधनंतथा
शीलंवयस्तस्यकन्यास्वजनैर्नचदीयते २९
सउवाचद्विजश्रेष्ठदत्तंमेदक्षिणंकरम्
कदाचिदन्यथाकर्तुंनशक्नोमिचसर्वथा ३०
इत्युक्त्वातान्सविप्रायकन्यांदातुंप्रचक्रमे
दृष्ट्वेतिज्ञातयःसर्वेविस्मयमद्भुतंययुः ३१
सत्यंतद्वचनंश्रुत्वाशंखचक्रगदाधरः
आविर्बभूवसहसाचारुह्यगरुडंमुने ३२
श्रीभगवानुवाच
धन्यंतेचकुलंधर्मोधन्यस्तेजननीपिता
धन्यंतेवचनंसत्यंधन्यंतेदक्षिणंकरम् ३३
धन्यंकर्म्मचतेजन्मत्रैलोक्येनैवविद्यते
एवंतेकर्मणासाधोचोद्धारंकुरुषेकुलम् ३४
सूतउवाच
एवंब्रुवतिश्रीकृष्णेविमानंस्वर्णनिर्मितम्
आगतंहरिगणैर्युक्तंसर्वत्रगरुडध्वजम् ३५
सर्वंतस्यकुलंब्रह्मन्सश्वपाकपुरोहितम्
रथेचारोपयामासशंखपद्मधरःस्वयं ३६

गृहीत्वातान्हरिः सर्वान्गतोवैकुंठमंदिरम्
तत्रतस्थौचिरंतेचकृत्वाभोगंसुदुर्ल्लभम् ३७
वचनंलंघयेद्यस्तुयस्तुवादद्विणांकरम्
सकुलोनिरयंयातिसत्यंसत्यंवदाम्यहम् ३८
तस्यान्नंतुजलंब्रह्मन्नग्राह्यंपितृदैवतैः
त्यक्त्वाधर्मोगृहंतस्यभीत्यायातिद्विजोत्तम ३९
दत्वाशांयोजनः कुर्यान्नैराश्यंचैवमूढधीः
सस्वकान्कोटिपुरुषान्गृहीत्वानरकंव्रजेत् ४०
वचनंलंघयेद्यस्तुधर्मस्तस्यविलंघति
नृपाग्नितस्करैर्विप्रसत्यंसत्यंसुनिश्चितम् ४१
स्वर्गोत्तरमिमंसम्यक्श्रुत्वास्वर्गोत्तरंव्रजेत्
जीवन्मुक्तस्त्विहामुत्रकृष्णाख्यंधामचोत्तमम् ४२

इति श्रीपाद्मेमहापुराणेब्रह्मखंडेसूतशौनकसंवादे
षड्विंशतितमोऽध्यायः २६

इति स्वर्गोत्तरापरनामकं ब्रह्मखण्डं संपूर्णम्
इति श्री पाद्मे महापुराणे चतुर्थं ब्रह्मखण्डं समाप्तम्